राधाकृष्णरसायनम्

(भक्तिकाव्यम्)

प्रणेता
श्री ओट्टूर उण्णि नम्बूदिरीपादः

१९८२

देववाणी-परिषद्, दिल्ली

राधाकृष्णरसायनम्

(भक्तिकाव्यम्)

रचयिता

श्री ओट्टूर उण्णि नम्बूदिरीपादः

१९८२

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

राधाकृष्णरसायनम् (संस्कृतभक्तिकाव्यम्)

प्रणेता : श्रीओट्टूरउण्णि नम्बूदिरीपादः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणो प्रिंटर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथमम्, १९८२

मूल्यम् : चत्वारिंशद् रूप्यकाणि, रु० ४०.००

RADHAKRISHNARASAYANAM
(Devotional Poetry In Sanskrit)

Author : Ottur Unni Nambudiripad

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printers : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1982

Price : Rs. Forty only. Rs. 40.00

अनुक्रमणिका

(भूमिकाभागः)

प्रास्ताविकम् : डा० रमाकान्त शुक्लः
महासचिवः, देववाणी-परिषद्, दिल्ली क-ख

राधाकृष्ण- डा० शास्त्रपुरम् रामकृष्ण (सी० आ.र०) स्वामिनाथः,
रसायनप्रणेता : भारतसर्वकारस्य, शिक्षामन्त्रालये, उपपरामर्शदाता
(संस्कृतस्य) ग-घ

श्रीओट्टूरउण्णि-
नम्बूदिरीपादकृतं-
राधाकृष्णरसायनम् : डा० रमाकान्त शुक्लः ङ-त

(काव्यभागः)

१.	अग्निमीले	१-२
२.	नमः	३-५
३.	भजे	६-८
४.	स्फुरतु मे हृदि	९-१२
५.	कदा स्यात्	१३-१६
६.	ध्यानश्लोकमञ्जरी	१७-२३
७.	पादोपसर्पणम्	२४-२५
८.	भावनापञ्चकम्	२६-२७
९.	आत्मनिवेदनम्	२८-३०
१०.	त्रिमूर्तिः	३१-३४
११.	नन्दकिशोरः	३५-४०
१२.	भुजङ्गप्रयातम्	४१-४३
१३.	नामसङ्कीर्तनम्	४४-४८

१४.	राधाविलासः	४६-८५
१५.	राधाराधनम्	८६
१६.	क्व ? क्व ?	८७
१७.	नृत्यति	८८-८६
१८.	सेवे	६०-६१
१६.	न जाने	६२-६७
२०.	पादादिकेशान्तम्	६८-१०३
२२.	राधां नमामि	१०४-१०७
२२.	राधावैभवम्	१०८-१०६
२३.	राधिकाऽस्मान् पुनातु	११०-११२
२४.	राधिका नः पुनातु	११३-११५
२५.	शुद्धिपत्रम्	११६

--: ० :--

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थायाः सद्ग्रन्थप्रकाशन-रूपमप्येकमुद्देश्यमस्ति। तदनुसारमद्यावधि परिषदा इमे संस्कृतभाषानिबद्धा ग्रन्थाः प्रकाशिताः- (१) सुगमरामायणम् (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (२) श्रीकृष्ण-चरितम् (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (३) कर्णभूषणम् (डा० सी० आर० स्वामिनाथ-कृतं नाटक-शोकगीतिप्रबन्धात्मकं रचनात्रयम्), (४-६) अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (डा० रमाकान्तशुक्लसम्पादितः खण्डत्रयात्मकः समीक्षाग्रन्थः) (७) हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्ललिखितम्) (८) श्रीमदप्पयदीक्षित-चरितम् (डा० हरिनारायणदीक्षितरचितम् गद्यकाव्यम्) भाति मे भारतम् (डा० रमाकान्तशुक्लप्रणीतं काव्यम्) (१०) भारतस्वातंत्र्यसंग्रामेतिहासः (डा० रमेशचन्द्रशुक्ल-कृतः)(११)सदाशयसमुच्चयः (श्री टी० वी० परमेश्वरअय्यर-प्रणीतः) (११) आभाणकमञ्जरी (श्री टी० वी० परमेश्वर-अय्यरप्रणीता) (१३) देववाणीदर्शनम् (डा० रमेशचन्द्रशुक्ला-दिसम्पादितम्) (१४) जय भारतभूमे ! (डा० रमाकान्तशुक्ल-प्रणीतं काव्यम्)च। परिषदा डा० देवीदत्तशर्मभिर्हिन्द्यां रचिताः संस्कृतसाहित्यपरकाः (१५-१८) 'मेघदूत : एक विश्लेषण'-'रघुवंश : एक विश्लेषण' 'अभिज्ञान शाकुन्तलः एक विश्लेषण' कालिदास की कला और संस्कृति (भाग २) इति ग्रन्था अपि प्रकाशिताः ।

इदानीं च परिषदियं श्री ओट्टूर उण्णिनम्बूदिरीपादप्रणीतं 'राधाकृष्णरसायनं' नाम संस्कृतभाषानिबद्धं भक्तिकाव्यं प्रकाशयन्ती अमन्दमानन्दमनुविन्दति ।

'राधाकृष्णरसायनं' हि भक्तिभावभरितं सत्काव्यरसायनमस्ति यत्स्वादं स्वादं निपीय जना अजरामरतामनुभवन्ति। संस्कृतसाहित्यस्यार्वाचीनकालेऽपि भक्तिगङ्गा कियत्या चारुतया प्रवहमाना त्रिविधतापतप्तानि चेतांसि आनन्दामृत धारायां निमज्जयतीति अनुभवि सहृदयैः राधाकृष्णरसायनं पेयम्। अत्र सरलसरसभावानुद्गिरन्ती देववाणी नितान्तं रमणीयतां दधाति। 'राधाकृष्णरसायन'-प्रणेतॄणां श्री ओट्टूरउण्णिनम्बूदिरीपादानां विषये डा० शास्त्रपुरम् रामकृष्ण (सी० आर०) स्वामिनाथैः 'राधाकृष्णरसायनस्य विषये चैतत्पङ्क्तलेखकेन यथामति लिखितं लेखद्वयमनुपदमेव दीयते येन कवेः कृतेश्च संक्षिप्तः परिचयः सहृदयैर्लभ्येत।

अहं देववाणी-परिषत्पक्षतः श्री ओट्टूरउण्णिनम्बूदिरी=पादान् सश्रद्धं प्रणमामि यैः कालजयिनः स्वस्यास्य काव्यस्य प्रकाशनमतोऽनुमतम्। तेषां शतायुष्यं कामयमानोऽहमस्या अमृतनिष्यन्दिन्याः काव्यकृतेः प्रसृमरता कामये।

विदुषामाश्रवः
रमाकान्तशुक्लः
महासचिवः
देववाणी-परिषद्, दिल्ली

६ जुलाई १९८२ ई०, व्यासपूर्णिमा
६, वाणी-विहारः
नयी दिल्ली-११००५९

राधाकृष्णरसायनप्रणेता

(डा० सी० आर० स्वामिनाथन्, भारतसर्वकारस्य शिक्षामन्त्रालये, उपशिक्षापरामर्शदाता, नव दिल्ली)

श्री ओट्टूरउण्णिनम्बूदिरीपादः १९०४ ख्रिस्टाब्दे केरलप्रान्ते 'ओट्टूरमन' इति प्रसिद्धे द्विजकुले जनिमलभत्। सप्तमे वयस्युपनीतः स्वपितृचरणादेव सार्धचतुर्वर्षाभ्यन्तरे ऋग्वेदसंहितां पूर्णतया कण्ठस्थीकृत्य पद-क्रम-जटा-रथपर्यन्तेषु विकृतिपाठेष्वपि नैपुणीं सम्पाद्य 'कटवल्लूर' परीक्षायां सर्वप्रथमत्वेनोत्तीर्णः। वेदाध्ययनकाल एव निजगृहे श्रीमद्भागवतपारायणाय नियुक्तस्य श्रीकृष्णशास्त्रिणः सकाशात् काव्यनाटकाद्यध्ययनं चकार। तदनन्तरमाङ्लभाषामधीत्य आई०सी०एस० पर्यन्तं परीक्षाः दातुमुत्सुकोऽभूत्। किन्तु शरीरास्वास्थ्यहेतोः उपरिपठनेऽसमर्थः नैराश्यमनुभवन् विवेकानन्दस्योपन्यासानां तेषां द्वारा श्रीरामकृष्णपरमहंसस्य दिव्यचरितावगाहने निर्वृतिमवाप। कैरलीभाषायां लिखितः श्रीरामकृष्णचरिताह्वयः लघुः ग्रन्थः उण्णिनम्बूदिरीपादस्य सर्वतोमुखीनपरिवर्तनायालमभूत्। आंग्लभाषाध्ययनेन वैज्ञानिकीमुन्नतिं प्रापिप्सोः नास्तिक्यविचारधारासु प्रचलतस्तस्य हृदये आध्यात्मिकतथ्यानां नवीनं मूल्यांकनं सञ्जातम्। ईश्वरो नास्ति, यद्यप्यस्ति, स विदूरस्थः अदृश्यश्च अकिञ्चित्करश्चेति ये विचाराः आसन् तेषां स्थानमीश्वरातिरिक्तं किंचिदपि नास्ति, स अतीव निकटतम इति बोधः समजनि। इयमेव विचारधारा अहर्निशं तं प्रेरयन्ती श्रीरामकृष्णभगवतः परोक्षया कृपया श्रीगुरुवायूरपुरेशं श्रीमद्भागवतञ्चावलम्ब्य जीवितयात्रां कर्त्तुं धैर्यमदात्। एवं तस्य रोगबाधा एवानुग्रहरूपेण परिणामतः रात्रिन्दिवं भगवच्चिन्तायां काव्यरचनायाञ्च तं न्ययुङ्क्त।

आशैशवात् गृहस्था वृद्धाः याः कथाः श्रावयन्ति स्म, यासां प्रेरणया बाल्य एव कञ्चिदश्मखण्डं देवतारूपेण विभाव्य पूजयति स्म, ताः सर्वाः प्रौढस्य नम्बूदिरीपादस्य भक्तिप्रवाहजनितानां कवितानां हेतवोऽभूवन् ।

गतचत्वारिंशद्वर्षेभ्यः श्रीरामकृष्णाश्रमे वसता कवितल्लजेन नम्बूदिरीपादेन परश्शताः रचनाः देववाण्यां कैरल्याञ्च लिखिताः प्रकाशिताश्च । दारिद्र्यतप्तोऽप्ययं कदाचिदपि रमारमणमतिरिच्य कमपि किमपि नायाचत । स्वाराध्यस्य नन्दसूनोः पुरतोऽपि स्वकीयामार्थिकीं स्थितिमधिकृत्य किमपि न प्रार्थितवान् नापि लिखितवान् । कृष्णभक्तिमेव स्वैश्वर्यत्वेन परिगणय्य आत्मारामवत् स्वकीयं जीवनं यापयति कविसार्वभौमोऽयम् ।

दिल्ल्याः देववाणी-परिषदोऽर्वाचीनसंस्कृतसाहित्यप्रकाशनोद्यमस्य शिखरभूतोऽयं प्रयत्नः यत् श्री ओट्टूरउण्णिनम्बूदिरीपादानां कृपया तेषां संस्कृतकृतीनां प्रकाशनं राधाकृष्णरसायनरूपेण सम्पाद्यते । 'केरल साहित्य अकादमी' एतान् पुरस्कारदानेन सम्मान्य यथा स्वगौरवमवर्धयत् तद्वदियं देववाणी-परिषदपि अस्य महानुभावस्य काव्यगुच्छप्रकाशनेन स्वकीयं गरिमाणं सगर्वमुद्घोषयति ।

:- ० :-

श्रीओट्टूरउण्णिनम्बूदिरीपादविरचित

राधाकृष्णरसायनम्

(डा० रमाकान्त शुक्लः)

'राधाकृष्णरसायनम्' इत्याख्यमिदं भक्तिरसपरिप्लुतं काव्यमर्वाचीनसंस्कृतसाहित्यस्यानुपमं रत्नमस्ति। राधाकृष्णभक्तिभावितेन कविनास्मिन् काव्ये स्वाराध्ययोः राधाकृष्णयोर्विषये भावाः समुद्गीर्णाः । श्रीमद्भागवत-पद्मपुराण-मत्स्यपुराण-आदिपुराण-ब्रह्मवैवर्तपुराण-देवीभागवतादिपुराणेषु उज्ज्वलनीलमणि - राधिकोपनिषत् - सामरहस्योपनिषद्-विदग्धमाधव, ललितमाधव - नारदपाञ्चरात्र - चैतन्यचरितामृत-गीतगोविन्द सूरसागर - युगलशतक - केलिमाल - प्रभृत्यनेकेषु तत्तद्भाषानिवद्धेषु ग्रन्थेषु च पूर्वकविभिर्वर्णितयोः समाराधितयोश्च राधाकृष्णयोः स्वरूपमत्र समुपश्लोकितमस्ति। क्वचित्कविः राधाकृष्णयोः स्तुतिं करोति, क्वचिच्च तयोर्लीलाः वर्णयति। सर्वमप्येतद् भक्तिरसायने परिणमति। इदं च रसायनं भवमहाज्वरार्तानां कृते स्वास्थ्यदम्। भक्तकविः श्री ओट्टूर उण्णिनम्बूदिरीपादो भगवद्भक्तिं विहाय न किमपि शरणमुररीकरोति—

रोगोऽस्ति शत्रुभयमस्ति विमाननास्ति
मूर्खत्वमस्ति खलतास्ति दरिद्रतास्ति ।
सर्वं च मेऽस्ति भगवंस्तव पादमूल-
च्छायां विहाय शरणं न विलोकयामि ।

भगवत्कृपाया महत्त्वं गायन् स व्याहरति—

पापश्शुचिर्भवति दुष्टमतिस्सुचित्तो
मूढो विवेचनपटुर्विषयी विरक्तः ।
क्षुब्धः प्रशान्तकरणो भवभाग्विमुक्त-
श्शुष्कश्च भक्तिरसिको भगवत्प्रसादात् ।।

(नन्दकिशोरः, १७-१८)

कविः विद्यातपोऽध्ययनदानजपादीनां तदैव साफल्यं मनुते यदैते भगवद्भक्तिलसिताः स्युः—

विद्यातपोऽध्ययनदानजपादयोऽन्ये
यद्योगतस्सफलतामुपयान्त्युपायाः ।
सद्यस्त्विमे स्युरफला यदसन्निधाना-
द्द्याद्धरिः स्वपदि तां रतिमेव मह्यम् ।।

(नन्दकिशोरः, २६)

'अग्निमीले', 'नमः', 'भजे', 'स्फुरतु मे हृदि', 'कदा स्यात्, 'ध्यानश्लोकमञ्जरी', 'पादोपसर्पणम्', भावनापञ्चकम्" 'आत्मनिवेदनम्', 'त्रिमूर्ति', 'नन्दकिशोरः', 'भुजङ्गप्रयातम्' 'नामसङ्कीर्तनम्', राधाविलासः', 'राधाराधनम्', 'क्व ? क्व ? 'नृत्यति', 'सेवे', 'न जाने', 'पादादिकेशान्तम्', 'राधां नमामि' 'राधावैभवम्', 'राधिकास्मान् पुनातु' तथा 'राधिका नः पुनातु' इति चतुर्विंशतिशीर्षकेषु रचितेषु षट्पञ्चाशदुत्तरपञ्च-शतसंख्याकेषु (५५६) पद्येषु क्वचित् कविः नराकृतिमुपेयुषं श्रीकृष्णात्मकं परं ज्योतिर्नमस्करोति, क्वचित्स्वाराध्यस्य महत्त्वं स्वस्य च लाघवं वर्णयति, क्वचिदात्मनिवेदनं करोति, क्वचिन्नन्दसूनोर्विविधाः कलाः वर्णयति, क्वचिद्राधाया अनन्य-प्रेमपरता-समर्पणशीलता-त्यागमयता-विरहसाधना-सात्त्विकता-दिगुणानां मनोरमव्यञ्जनां करोति, क्वचिच्च प्रकृतिवर्णनं विविधरसदशाश्चोपस्थापयति। किन्तु प्रत्यक्षरं कवेः भक्ति-भावना अनुप्राणिता अस्ति ।

तदित्थं भक्तिभावनामेव जीवनसर्वस्वं मन्यमानः कवि राधाकृष्णौ स्तौति, तयोर्लीलागानं करोति, तयोर्नाम सङ्कीर्तयति । सः कथयति—

ब्रह्मोद्यं कतिचिन्मखं कतिपये योगासनं केचन
ब्रह्मध्यानमथापरे शमदमावन्ये तपश्चेतरे ।
सेवन्तां भवमुक्तये निजनिजाभीष्टेन नानाध्वना
किन्त्वेते वयमत्युदारभगवन्नामैकमाराध्नुमः ॥

(नामसङ्कीर्तनम्, २०)

काव्यस्यास्य वैशिष्ट्यमिदं यच्छ्रीमद्भागवतादिपारायणरता अश्रुतभागवतादिकाश्च पाठका. समानरूपेण आनन्दलहरीषु निमज्जन्ति एतत्पाठकाले ।

कविना 'राधा-विलासे' प्रबन्धरीत्या राधोदन्तः प्रस्तुतः, यो हि लौकिकानां जनानां कृतेऽपि परमरमणायः, भक्तानां कृते तु तस्य कथैव का ? अमुं राधाविलासं पठित्वा श्रुत्वा वा को नामानन्दजाश्रुधौतकल्मषो न भवति ? सचेतसामानन्दाय पद्यद्वयं प्रस्तूयते यत्र राधायाः कृष्णं प्रति अनन्यता व्यज्यते । विरहव्रता राधा कथयति –

आयातु वा गच्छतु वा यथेष्टम्
मां स्तौतु वा निन्दतु वार्यपुत्रः ।
सर्वास्ववस्थास्वपि राधिकेयम्
तुष्टास्मि सिद्धाखिलवाञ्छितास्मि ॥
विसृज्य मां गच्छ विदूरदेशम्
परस्त्रियां स्निह्य यथाभिलाषम् ।
दुरन्तदुःखे क्षिप निर्भयं मां
तथापि मे प्राणपतिस्त्वमेव ॥

(राधाविलासः, १९५, २०४)

राधाविलासं विहाय अन्यत्र सर्वत्रापि स्तोत्रकाव्यं मुक्तककाव्यं वा समुल्लसति यत्र प्रत्येकं पद्यं स्वतन्त्ररूपेण सतां चमत्कारक्षममस्ति । एकैकस्मिन् पद्ये भक्तिरससमन्विताः सर्वे काव्यगुणाः विलसन्ति ।

श्रुतिविमृग्यः सर्वधर्मास्पदं लोकत्रयेशो लोककल्याणार्थं नराकृतिमुपोयिवान् श्रीकृष्णः वपुषा वेषेण वचोभिः कार्यैश्च अत्यन्तं चेतोहरोऽस्ति । सः सर्वा अपि मानवसुलभाः लीलाः करोति । स व्रजे नृत्यति, पशुकुलं चारयति, नवनीतं चोरयति, गोपिका अनुरञ्जयति, गोवत्सपुच्छेषु विलम्बते, गोरसचोरणावसरं प्रतीक्षमाणो गृहाङ्गणे क्वापि निलीय सतृष्णं तिष्ठति, चौर्यार्जितेन वदनान्तरगूहितेन वृहत्तमेन हैयङ्गवीनकवलेन बृंहत्कपोलयुगलः सन् जननीसमीपे तूष्णीं तिष्ठति, मात्रासम्यगलङ्कृतं निजवपुर्दर्पणे निर्वर्णयति, दुस्सहशिरोवेदनार्ताया जनन्या ललाटान्तरे स्निग्धं चन्दनलेपनं करोति, वानरेभ्यो नवनीतं यच्छति । तस्य लीला श्रुत्वा नरः पातकैर्विमुक्तो जायते :—

कोटीभिस्सह योधि मानसभुवां रूपे, व्रजस्त्रीदृशाँ
कोटीभिः प्रणयेन चुम्बितमशेषाङ्गेषु गौरीपतेः ।
कोटीरेण सभक्तिकं चरणयोस्स्पृष्टं कदाचित्तुला-
कोटीशिञ्जितपादकञ्जमविजाकुञ्जस्थमोजो भजे ॥

श्रुत्वा यस्य नवोद्धृतादिहरणं कंसादिनिष्पेषणं
रासक्रीडनकौतुकं च मधुरोदारं नरस्तत्क्षणात् ।
स्तेयप्राणिवधान्यदारगमनोद्भूतान्महापातका-
न्मुक्तस्सन् नितरां विशुध्यति भजे तं नन्द-
जायात्मजम् ॥

(भजे, ५, ६)

राधाकृष्णरसायनं कवेः श्रीमद्भागवतानुशालनस्य सुष्ठु परिचायकमस्ति । 'न जाने' इतिशीर्षकान्तर्गतेषु २०, २२, २३, २४, २५, २६, १७, २८ प्रभृतिषु पद्येषु समागतानामन्तः कथानां विस्तृतविवरणार्थं श्रीमद्भागवतमवलोकनोयम् । दवाग्नेर्वात्याया गरलसलिलाद् व्यालवदनात् तडिद्भ्यः वृष्टिभ्यो दितिजदनुजेभ्यच व्रजजनान् रक्षित्वा श्रीकृष्णः कथं तानशरणानिव तत्याज इत्येताः कथा श्रामद्भागवतस्य दशमस्कन्धस्य १९, ७, १५, १२, १६, २५, ११, ३९, तमेषु अध्यायेषूपनिवद्धाः सन्ति । कविरयं कियत्या मनोरमशैल्या घटे सागरमेव मातुं प्रभवतीतिसहृदयैरवलोकनीयम् :

दवाग्नेर्वात्याया गरलसलिलाद् व्यालवदनात्
तडिद्भ्यो वृष्टिभ्यो दितिजदनुजेभ्यो व्रजजनान् ।
मुहू रक्षित्वान्ते त्यजति बत यस्तानशरणान्
न जाने सोऽयं किं मृदुलहृदयः किं कठिनधीः ॥

(न जाने/१०)

एवमन्यत्राप्यूह्यम् ।

एतादृशेषु पद्येषु कवेर्भाषायाः समासशक्तिः कल्पनायाश्च समाहारशक्तिरवलोकनीये विद्येते । कविना श्रीकृष्णचैतन्य-श्रीरामकृष्णविषयक किंवदन्तीनामपि काव्यात्मकसङ्केतः कृतः—

एतन्महाभावपिपासयैव
कृष्णोऽपि राधाभिनयं वितन्वन् ।
श्रीकृष्णचैतन्यकलेवरञ्च
श्रीरामकृष्णाकृतिमप्यबिभ्रत् ॥

(राधाविलासः १७१)

(अन्यच्च द्र० राधिका नः पुनातु, १२)

श्रीकृष्णस्य राधाभिनयस्य चित्रणमनेकैर्बङ्गला-हिन्दी-संस्कृतादिभाषाकविभिः कृतम्। उपर्युक्तपद्यस्य पूर्णव्याख्यार्थं तत्काव्यमवलोकनीयम्।

भक्तिभावभरिते ऽस्मिन् काव्ये काव्यमार्गरसिकैराकांक्षिताः सर्वे काव्यगुणा अपि निहिताः सन्ति। भक्तिशृङ्गारवत्सल-रसानामत्र मनोहारि व्यञ्जनं भवति। माधुर्यप्रसादौजोगुणानां यथावसरमभिव्यक्तिः, अलङ्काराणां संगुम्फनम् विविधच्छन्दसां प्रयोगः प्रकृति-चित्रणं, नखशिखवर्णनम्, सुभाषितविधानमित्येवमादीनि काव्योत्कर्षविधायकानि तत्त्वानि अत्र विलसन्ति।

वात्सल्यवर्णने तु श्रीओट्टूरउण्णिनम्बूदिरीपादः विंश-शताब्दिकः संस्कृतभाषायाः 'सूरदास' इव प्रतीयते। बालक-श्रीकृष्णस्य बाल्योचिताः समस्ता अपि चेष्टास्तेन चारु चित्रिताः। दिङ्मात्रमुदाह्रियते.-

रिङ्गन्नन्दवधूगृहेषु करयोर्जान्वोर्युगाभ्यां मुदा
सुस्मेरं शतपत्रचारुनयनं कादम्बिनीसुन्दरम्।
स्वस्याङ्गं प्रतिबिम्बितं मणिमये तत्कुट्टिमे प्रस्फुटम्
दृष्ट्वा मोहितधीस्तदाशु बहुशश्चुम्बञ्छिशुर्भातु मे॥

(ध्यानश्लोकमञ्जरी, ११)

वियोगशृङ्गारस्यात्यन्तं निर्मलाभिव्यक्तिरेतत्काव्ये 'राधाविलासे' कर्तुं शक्यते। अद्भुतरसस्याभिव्यक्तिः 'न जाने' इत्यत्रान्यत्र च कर्तुं शक्यते। किन्तु सर्वातिशायी भक्तिरसस्तु सर्वत्रैव अस्वादयितुं शक्यते।

प्रकृतिचित्रणमपि यथावसरं सचेतसां चित्तानि हरति। पश्यन्तु सहृदयाः—

'साटोपनृत्तैशिखिमण्डलाना-
मत्युच्चगीतैः पिकसञ्चयानाम्।
स्वच्छन्दचारैर्हरिणव्रजानां
रराष्टि वृन्दावनपुण्यभूमिः॥

क्वापि श्रुतिर्मत्तमधुव्रताना
मेकत्र गीतं कलकोकिलानाम् ।
अन्यत्र तालो गिरिनिर्झराणां
रारास्ट्यहो यामुनरम्यदेशः ॥

मञ्जुप्रणादैर्गिरिनिर्झराणां
मन्दप्रयाणैर्मलयानिलानाम् ।
लीलाविलासैर्वनवल्लरीणां
वृन्दावनं रञ्जयतीन्द्रियाणि ॥

(राधाविलासः, ६१-६३)

सूक्तिविधानमपि यथावसरं दृग्गोचरीकर्तुं शक्यते । प्रायः सुभाषितेषु भक्तिभावस्य माहात्म्यमेव समुन्मील्यते कविना यथा—

सोऽयमेव विरलं पुरुभाग्यं
सोऽयमेव परमः पुरुषार्थः ।
यो निरन्तहरिस्मृतिहेतो-
स्सन्ततः प्रणयबाष्पविमोक्षः ॥

औन्नत्यं किमुदारदेशिकपदे साष्टाङ्गपादा नति-
स्सम्पत्का जगदात्मने भगवते निश्शेषवित्तार्पणम् ।
मुक्तिः का मुरवैरिभक्तिनिगडैर्नित्यानुबद्धस्थिति-
स्सौख्यं किं हरिविप्रयोगकदनादत्युत्कटं रोदनम् ।

(राधाविलासः १७५, १७७)

भाषायां प्रसादगुणः सर्वत्र साक्षात्क्रियते । दीर्घसमासयुतायां वा, लघुसमासयुतायां वा, समासहीनायां वा भाषायां सर्वत्रापि कोमलभावानुरूपिणी प्रासादिकता विलसति । स्रग्धराशार्दूलविक्रीडित पृथ्वीसदृशेषु दीर्घवृत्तेषु इन्द्रवज्रा-तोटकादिषु लघुवृत्तेषु च भाषाया समस्तं व्यस्तं च उभयमपि रूपं

कवेर्वशंवदमिव तिष्ठति । क्वचित्सम्पूर्णमपि पादमेकमेव समस्तपदं व्याप्नोति, क्वचिच्च मुक्ताफलानीव व्यस्तानि पदानि सचेतसां चेतांसि हरन्ति । यथा—

समस्तपदावली

मन्दस्पन्दिमनोज्ञचिल्लिलतिकासंरञ्जितालोकनं
मञ्जुस्यन्दिमनोहरस्मितसुधामज्जन्मुखाम्भोरुहम् ।
सच्चिद्गन्धि सुनीलकान्तिलहरीपोप्लूयमानाङ्गकं
वन्दे नन्दगृहाङ्गणप्रणयिणं ब्रह्माण्डकोटीश्वरम् ॥

(नृत्यति, ८)

मुहुर्मन्दस्पन्दिभ्रुकुटिरुचिरापाङ्गविहृति-
र्मधुस्पन्दिस्मेरस्फुरदधरसंचुम्बिमुरलिः ॥

(न जाने, ५)

वेदवेदान्तशास्त्रागमान्वेषितं
राधिकादोर्लतापल्लवाच्छादितम् ।
भक्तिवैवस्वतीस्निग्धकुञ्जस्थितं
शक्रनीलत्विषं बालकं भावये ॥

(भावनापञ्चकम्, ४)

असमस्तपदावली

कृष्णः किं द्वारवत्यां भवति किमु ततस्सोऽद्य कुत्रापि यातः
का वा तं स्नेहपूर्वं परिचरति सदा तस्य किं क्षेममेव ।
वृन्दारण्यं कदा वा पुनरपि भगवानाव्रजेदित्यशेषान्
पृच्छन्ती मौनभङ्ग्या श्वसनविलपनैः राधिकाऽस्मान्
पुनातु ॥

(राधिकास्मान् पुनातु, ४)

किं वा करोमि क्व नु वा व्रजामि
कं वा स्फुटं वच्मि कथं ब्रवीमि ।
आधिं ममान्तर्हृदये ज्वलन्तं
वेत्तुं विदग्धः किमु मानुषोऽस्ति ॥
(राधाविलासः, ६४)

भक्तिसुधापरिपूरितस्यास्य काव्यस्य रमणीयत्वं सम्पादयितुं यद्यपि भक्तिभावमतिरिच्य न चित्रविचित्रा अलङ्कारा अपेक्ष्यन्ते तथापि भक्तिभावेन आत्मानं संयोज्य स्वशोभां वर्द्धयितुमिव अहमहमिकया अनेकेऽपृथग्यत्ननिर्वर्त्याः स्वाभाविका अलङ्काराः अत्र सम्प्राप्ताः। यमक-लाटानुप्रास-उपमा-रूपक-उत्प्रेक्षा-अतिशयोक्ति-विभावना-सन्देह -व्यतिरेक - विरोध - उल्लेख - विषम-स्वभावोक्तिप्रभृतीनामलङ्काराणां निसर्गरमणीयः प्रयोगः सहृदयानां पूर्वकविप्रणीतविविधग्रन्थामृतास्वादनक्रीडादुर्ललितानि मनांसि हर्तुमलमस्ति । व्यतिरेक-आस्वाद्यतां सहृदयैः

खलानां हृदि त्राससम्भ्रान्तकारी
सतां चेतसस्सर्वभीतिप्रणाशी ।
मृतानां स्वदंशैरमर्त्यत्वदायी
निशीथेषु कश्चिद् भुजङ्गः प्रयाति ॥
महामोहहालाहलग्रासदक्षो
बहुस्वादुकैवल्यपीयूषवर्षी ।
सदा कुण्डलिन्या समन्विष्यमाण-
स्सदानन्दरूपो भुजङ्गः प्रयाति ॥
(भुजङ्गप्रयातम्, १-२)

उल्लेखच्छटां निभालायन्तु सहृदयाः

अविद्यापदे कालपाशायमानो
व्रजस्त्रीगले स्वर्णसूत्रायमानः ।
त्रयीमस्तके रत्नमालायमानो
महाश्चर्य एको भुजङ्गः प्रयाति ।।

(भुजङ्गप्रयातम्, ५)

यथा वा

दम्भोलिर्दुरिताचलेन्द्रशिखरे, मायामरौ शाद्वलो
भानुर्मोहमहान्धकारनिकरे, कामामये भेषजम् ।
सेतुर्मृत्युपयोनिधौ, हिमकरो जीवौषधीमण्डले
पीयूषं सुजनानने च तदिदं राराष्टि नामाक्षरम् ।।

(नामसङ्कीर्तनम्, १३)

'ध्यानश्लोकमञ्जर्यां' 'स्फुरतु मे हृदि' इत्यादिशीर्षकेषु निबद्धेषु पद्येषु स्वभावोक्तिरवलोकनीया विद्यते । बालकश्रीकृष्णस्य वर्णनं कुर्वन् कविः कथयति

मातुः पार्श्वे शयित्वा स्फुरदधरपुटेनास्थया स्तन्ययूषम्
कर्णाभ्याञ्चात्ततृष्णं सरसशुभकथास्सम्पिबन्यामिनीषु ।
मन्दं स्निग्धेन तस्याः किसलयमृदुना पाणिना ताडितोरु-
र्निद्राक्रान्तो निरीहो मुकुलितनयनश्चाभवन्नित्यबुद्धः ।।

भूमावर्पितपाणिजानुयुगलस्यार्कं नमस्कुर्वतः
श्रद्धालोर्जनकस्य पृष्ठमधिरुह्यावस्थितस्सस्मितम् ।
रे रे मत्तगज ! द्रुतं चल चलेत्याज्ञापयन्नोजसा
तं भूयः प्रहरन् करेण च पदा चाव्याद्व्रजेशात्मजः ।।

(ध्यानश्लोकमञ्जरी ६, १३)

सन्देहालङ्कारं 'न जाने' इतिशीर्षकान्तर्गतसङ्कलितेषु पद्येषु अन्यत्र च साक्षात्कर्तु मर्हन्ति सचेतसः। तद्यथा

मन्दानिलः किं कलकोकिलः किं
चन्द्रोदयः किं शरदागमः किम्
रोमोत्सवः किं प्रणयाम्बुधिः किं
प्रादुर्भवत्यद्भुतमूर्तिरेका ॥

(राधाविलासः, २८)

यथा वा

किमु ज्योत्स्नायूषः किमु शिशिरकर्पूरसलिलम्
किमु क्षीरासेकः किमु सुविकसत्कुन्दकुसुमम् ।
किमु स्नेहोल्लासः किमु विमलमुक्तामणिगणो
न जाने केयं या स्फुरति सितकान्तिः शिशुमुखे ॥

(न जाने, ६)

एवमेवान्येषामप्यलङ्काराणामुदाहरणानि द्रष्टुं शक्यन्ते।

छन्दोविधानम्

कविनाऽस्मिन् काव्ये अनुष्टुबिन्द्रवज्रोपेन्द्रवज्रा-तोटक-पृथ्वी -भुजङ्गप्रयात - मालिनी-वसन्ततिलका-शार्दूलविक्रीडित-शालिनी-शिखरिणी-स्रग्धरा-स्रग्विणी-स्वागतेति चतुर्दश वर्ण-वृत्तानां प्रयोगो व्यधायि। सर्वाधिकमिन्द्रवज्रा प्रयुक्ता। तस्यां षडशीत्युत्तरैकशतं (१८६) पद्यानि रचितानि। तत्तद्वृत्तेषु रचितानां पद्यानां संख्येत्थमस्तिः- अनुष्टुप्-२, इन्द्रवज्रा-१८६, उपेन्द्रवज्रा-१८, तोटकम्-१२, पृथ्वी-१०, भुजङ्गप्रयातम्-३३ मालिनी-१६, वसन्ततिलका-४४, शार्दूलविक्रीडितम्-११८, शालिनी-२०, शिखरिणी-३५, स्रग्धरा-५३, स्रग्विणी-५, स्वागता-१। छन्दोरचनायां प्रायः कविना यतिमनुरुद्ध्यैव पदविन्यासः कृतः। दिङ्मात्रमुदाह्रियते पृथ्वीवृत्ते निबद्धं पद्यमेकं यत्र अष्टसु नवसु च वर्णेषु यतिः पाल्यते :—

कृपानिलविलोलिता (८) व्रजविलासिनीलालिता (६)
विलासनवपल्लवा (८) मृदुलहासपुष्पोत्करा (६)
श्रुतिभ्रमरमार्गिता (८) मुरलिकाशुकीकूजिता (६)
विकर्तनसुतातटे (८) लसति कापि सच्चिल्लता (६)

(नमः/१)

अत्यन्तं विरलानि तान्युदाहरणानि यत्र यतिस्थाने कस्यचिच्छब्दस्य सम्पूर्णता न भवति यथा

'फालेजत्कुटिलालकस्सुरुचिरा (१२) पाङ्गे यशोदागृहे

(ध्यानश्लोकमञ्जरी, ३)

अत्र शार्दूलविक्रीडिते द्वादशवर्णेषु 'सुरुचिरापाङ्गः' इति शब्दः पूर्णतां न याति, अपितु तस्य भङ्गो भवति। प्रायः कविना दीर्घसमासपदावल्यामपि यतिस्थाने शब्दानां पूर्णता परिपालिता; यथा

व्यालोलत्पीतचेल (६)/स्वरसपरिगलत् (६) /स्मेरलीलावलोकः।

(ध्यानश्लोकमञ्जरी/३०)

अत्र सप्तसु वर्णेषु शब्दाः पूर्णाः सन्ति। उच्चारणकर्ता सौविध्येन स्राधरां पठितुं शक्नोति। समस्तपदावलीमेकश्वासेऽपि प्रस्तुवन् पाठकः उच्चारणे प्रासादिकतां रक्षितुं समर्थः। इत्थं कवेश्छन्दोविधाननैपुण्यं स्पष्टमेव सिद्ध्यति।

वस्तुत एतादृशस्य भक्तिकाव्यस्य समीक्षणार्थं काव्यशास्त्रेषु आचार्यैर्निदिष्टा समीक्षामानदण्डा एव सर्वथा प्रमाणं न भवन्ति; अस्य आस्वादनार्थं तु भगवद्भक्तिसुधासिञ्चितं निष्कलुषं हृदयमेव प्रमाणं भवति। अस्मत्सदृशो लौकिको जन एतस्य काव्यस्य समीक्षणे सर्वथा असमर्थ एव सिद्ध्यति।

अग्निमीळे

(१)

स्वैरं सहस्रारसरोजपीठाद्
ब्रह्माण्डरूपस्य कलेवरस्य ।
कारुण्यहेतोरवतीर्य घोषे
शश्वत्स्थितं यौगिकमग्निमीळे ॥

(२)

यश्शूरपुत्रारणितः प्रजातो
यो गोपराजो हवनेन वृद्धः ।
यस्मिन् बकाद्याश्शलभाः पतन्ति
तं सर्वधर्मास्पदमग्निमीळे ॥

(३)

यो योगिनां भासयतेऽन्तरङ्गम्
यो देहिनां प्लोषति कर्मबन्धम् ।
यो वल्लवीस्नेहहविश्च भुङ्क्ते
तं मोदसच्चिन्मयमग्निमीळे ।

(४)

यो देहभाजां जठरेषु तिष्ठन्
सम्यक् पचत्याहृतमन्नपुञ्जम् ।
यश्चामरेभ्यो हुतयज्ञभागान्
स्वान् स्वान् वहत्याशु तमग्निमीळे ॥

(५)

इध्मं विनैव ज्वलति स्वयं यो
ज्योतिर्गणो राजति यस्य भासा ।
यश्चान्तकव्यालभयं निहन्ति
तं विश्वसञ्जीवनमग्निमीळे ॥

(६)

कालाग्निरूपेण बहिश्शरीरम्
ज्ञानाग्निरूपेण च लिङ्गदेहम् ।
दग्ध्वा निजानन्दमयं वपुर्यो
जीवात्मने राति तमग्निमीळे ॥

(७)

एकान्तभक्त्यात्मकहोमकुण्डे
सायुज्यमुक्त्यात्मकदारुगर्भे ।
रूपेण नीरूपतया च नित्यम्
वर्वर्ति यस्तं शुभमग्निमीळे ॥

(८)

गोपीषु शृङ्गारमयोऽतिशीतो
दैत्येषु चाङ्गारमयो भृशोष्णः ।
द्वेधा विराजन् युगपत् सुखं च
दुःखं च यो राति तमग्निमीळे ॥

--: ० :--

नमः

(१)

कृपानिलविलोलिता व्रजविलासिनीलालिता
विलासनवपल्लवा मृदुलहासपुष्पोत्करा ।
श्रुतिभ्रमरमार्गिता मुरलिकाशुकीकूजिता
विकर्तनसुतातटे लसति कापि सच्चिल्लता ॥

(२)

समाधिगिरिपातिनी प्रणयसिन्धुसङ्गामिनी
कृपातरलशालिनी श्रुतिवधूलतासेचनी ।
महादुरितनाशिनी त्रिविधतापविध्वंसिनी
विमुक्तिरसदायिनी वहति कापि मन्दाकिनी ॥

(३)

पुरन्दरमुखैस्सुरैर्नमसिता कृपामाधुरी-
मरन्दरसनिर्भरा मुनिमनस्तमोभञ्जिका ।
पुलिन्दवनिताजनै रहसि सस्पृहं वीक्षिता
कलिन्दतनयातटे चरति कापि नीलप्रभा ॥

(४)

दिवाकरसुतातटे पशुपबालसंवेष्टितो
हलायुधसमन्वितः पशुकुलं मुदा चारयन् ।
अपाङ्गकलिकां किरन् ललितवंशिकां वादयं-
स्त्रिलोकमनुरञ्जयन्नटति वेदवेद्यः पुमान् ॥

(५)

कृपाधृतकलेवरं प्रणयहासमुग्धाधरम्
मनोज्ञमुरलीकरं कबरशोभिबर्होत्करम् ।
रमाश्रितभुजान्तरं कनकपीतनीवीधरम्
विलोलपदनूपुरं कलय चित्त दामोदरम् ।।

(६)

कलापरुचिरालकं तिलकरम्यफालान्तरम्
विलोलझषकुण्डलं विहितताण्डवभ्रूलतम् ।
अपाङ्गकृतवीक्षणम् स्मितसुधानिमग्नाननम् ।
क्वणच्चरणनूपुरं मुरलिकाकरं भावये ।।

(७)

महेन्द्रमणिदर्पणप्रतिममञ्जुगण्डस्थली-
विलोलसततोल्लसन्मकरकुण्डलालङ्कृतम् ।
स्मितांशुनवचन्द्रिकाद्रवदपाङ्गकृष्णानदी-
तरङ्गपरिवेष्टितं किमपि भावये श्रीमुखम् ।।

(८)

सितोर्ध्वतिलकोज्ज्वलं मुरलिकाशिखण्डाञ्चितम्
कृपार्द्रनयनाञ्चलं प्रणयहासलीनाधरम् ।
शशाङ्कसुभगाननं कटककिङ्किणीमण्डितम्
कलायसुममेचकं कमपि कान्तिपुञ्जं भजे ।।

(९)

विशालनिटिलस्थलं कनकपीतचेलोज्ज्वलम्
सदानुगतगोकुलं विहितघोषकोलाहलम् ।
प्रवृद्धकरुणाकुलं कृतविहारकौतूहलम्
समुद्धृतमहाचलं पृथुकमाश्रये पेशलम् ।।

(१०)

कलायकुसुमत्विषे शिरसि बर्हमालाजुषे
नवोद्धृतपयोमुषे निगमसौरभेयीपुषे
अघादिखलविद्विषे तरणिजातटे तस्थुषे
नराकृतिमुपेयुषे नम इदं परंज्योतिषे ॥

--: ० :--

भजे

(१)

बर्हालङ्कृतकेशमूर्ध्वतिलकोन्मीलल्ललाटान्तरम्
चञ्चत्कुण्डलगण्डशोभियुगलं हाराञ्चितोरःस्थलम् ।
काञ्चीवीतकटीतटं मुरलिकाराजत्कराम्भोरुहम्
कूजन्नूपुरपादयुग्ममतसीनीलं भजे दैवतम् ॥

(२)

बर्हैर्मोहनवेणुनोर्ध्वतिलकेनोत्फुल्लवन्यस्रजा
मञ्जीरैर्मणिकुण्डलेन कटकैरुद्दामकाञ्चीगुणैः ।
पीतक्षौमपटेन मन्दहसितैः केलीकटाक्षोत्सवैः
प्रत्यङ्गं समलङ्कृतामुपनिषन्मृग्यां भजे चारुताम् ॥

(३)

सूर्यापत्यतटीविहारनिरतं नीलोत्पलश्यामलम्
स्मेरापाङ्गविलोलहृद्यनयनम् चञ्चन्मनोज्ञभ्रुवम् ।
स्वारामैश्शुकनारदप्रभृतिभिर्नित्यं निदिध्यासितम्
श्रीराधाविरहासहिष्णुमखिलब्रह्माण्डनाथं भजे ॥

(४)

नालीकायतलोचनं शशधरश्रीमन्मुखं वंशिका-
नालीचुम्बितदन्तवाससमुरोव्यालम्बिवन्यस्रजम् ।
नालीकं श्रुतिमार्गितं ब्रजवधूगाढोपगूढं विमा-
नालीसंस्थसुरावकीर्णसुमनोगूढं विलासं भजे ॥

(५)

कोटीभिस्सह्योधि मानसभुवां रूपे, व्रजस्त्रीदृशाम्
कोटीभिः प्रणयेन चुम्बितमशेषाङ्गेषु, गौरीपतेः ।
कोटीरेण सभक्तिकं चरणयोस्स्पृष्टं कदाचित्तुला-
कोटीशिञ्जितपादकञ्जमविजाकुञ्जस्थमोजो भजे ॥

(६)

वेणीसन्दितचन्द्रकं मुरलिकासञ्चुम्बिबिम्बाधरम्
कान्त्या पल्लविताखिलाङ्गमुदयच्चन्द्राभिवन्द्याननम् ।
वेदैः पल्लवितापदानमतसीनीलं कृपाशीतलम्
गोपस्त्रीतपसां पचेलिमफलं कञ्चित्किशोरं भजे ॥

(७)

भोजेन्द्रादितिरस्कृतं श्रुतिगिरामाम्रेडनैस्संस्कृतम्
ब्रह्मेशादिनमस्कृतम् मुरलिकाबर्हालिकालङ्कृतम् ।
स्मेरालोकचमत्कृतं व्रजतले सुस्पष्टमाविष्कृतम्
गोपीगोपवशीकृतं परिभजे सौभाग्यमप्राकृतम् ॥

(८)

पिञ्छोद्यत्कचमण्डलं श्रुतिपुटीलोलन्मणीकुण्डलम्
वंशीवादनपेशलं नववनस्रग्वीतवक्षःस्थलम् ।
सम्यक्पालितगोकुलम् व्रजवधूसम्प्रीणनव्याकुलम्
कालिन्दीतटचञ्चलं परिभजे तेजो जगन्मङ्गलम् ॥

(९)

श्रुत्वा यस्य नवोद्धृतादिहरणं कंसादिनिष्पेषणम्
रासक्रीडनकौतुकं च मधुरोदारं नरस्तत्क्षणात् ।
स्तेयप्राणिवधान्यदारगमनोद्भूतान्महापातका-
न्मुक्तस्सन् नितरां विशुध्यति भजे तं नन्दजायात्मजम् ॥

(१०)

बालं जीमूतनीलं गलधृततुलसीनिर्मितालोलमालम्
मालेयालिप्तफालं मृदुलकटितटीचञ्चलत्पीतचेलम् ।
भक्तस्वान्तानुकूलं दिनमणितनयाकूलसञ्चारशीलम्
नानालीलाविलोलं कमपि परिभजे पिञ्छिकाशालिबालम्

(११)

नित्यारूढादिशेषं मुहुरशितनिजानन्दपीयूषयूषम्
वीताविद्यादिदोषं परमकरुणयोपात्तगोपालवेषम् ।
वंशीसंशोभिदोषं सुरुचिरचिकुरप्रस्फुद्बर्हभूषम्
कूजत्पादाब्जघोषं कमपि परिभजे नीलतेजोविशेषम् ।।

(१२)

पारावारस्य गर्भे भुजगपतिमये योगतल्पे शयानम्
कारागारे निशीथे निरुपमकृपया भोजराजोऽवतीर्णम् ।
स्मेरापाङ्गावलोकैश्शिशिरितककुभं मारकोटिप्रकाशम्
स्वारामाणां शरण्यं कमपि परिभजे श्यामलं श्रौतमर्थम् ।।

-: ० :-

स्फुरतु मे हृदि

(१)

वक्त्राम्भोजे सुन्दरं मन्दहासम्
स्निग्धापाङ्गे चारुलीलावलोकम् ।
कैशोराङ्गे नीलकान्तिञ्च बिभ्र-
च्चित्ते भायान्नैगमः कश्चिदर्थः ॥

(२)

बर्हं वेण्यामूर्ध्वपुण्ड्रं ललाटे
वेणुं पाणौ नूपुरं पादपद्मे ।
काञ्चीं श्रोण्यां वन्यमालां च कण्ठे
बिभ्रज्ज्योतिर्भासतां मानसे मे ॥

(३)

स्तन्यं चूषन् मातुरङ्के निषण्ण-
स्तस्या वक्त्रे दत्तदृष्टिस्सलीलम् ।
सान्द्रस्निग्धं स्यन्दयन् मन्दहासम्
स्वान्ते भायान्नन्दसीमन्तपुत्रः ॥

(४)

व्यादाय किञ्चिद्वदनाब्जकोशम्
दन्ताङ्कुराङ्कांश्चन सम्प्रकाश्य ।
प्रीत्या यशोदामुखमीक्षमाणो
मुग्धं हसन् मे हृदि भातु डिम्भः ॥

(५)

निवार्य वामेन करेण वत्सान्
क्षिताववष्टभ्य च हस्तमन्यम् ।
गवाँ स्तनं जानुचरोऽभिगम्य
तृषा धयन्मे हृदि भातु शौरिः ॥

(६)

कारुण्यशीलश्चपलाग्रगण्यः
प्रोद्दामहासैस्स्फुटिताननाब्जः ।
गोवत्सपुच्छेषु विलम्बमानः
पोस्फुर्यतां मे हृदि कोऽपि बालः ॥

(७)

राराज्यतां मे हृदि गोपगेहे-
ष्वालोकयन्काचितगव्यकुम्भान् ।
उच्चैर्हसन् निस्तुलमोदभारा-
दास्फोट्य नृत्यन् पुरुषः पुराणः ॥

(८)

आलोडयन्त्यां दधि नन्दपत्न्याम्
पृष्ठे शनैरेत्य तदीयनेत्रे ।
हस्ताम्बुजाभ्यां पिदधत्सलील-
मानन्दमूर्तिर्हृदि मे चकास्तु ॥

(९)

व्रजस्त्रियां गोरसचोरणाय
प्रतीक्षमाणोऽवसरं सतृष्णम् ।
गृहाङ्गणे क्वापि निलीय तिष्ठन्
जनार्दनः खेलतु मेऽन्तरङ्गे ॥

(१०)

निर्विश्य गोपीनिलयं निगूढ-
मारुह्य पीठं नवनीतकुम्भे ।
शिक्यस्थिते क्षिप्तकरस्समन्ता-
दालोक्य तिष्ठन् हृदि भातु कृष्णः ॥

(११)

मथ्ना स्वयं निर्मितसूक्ष्मरन्ध्रात्
काचस्थकुम्भात्तदधःस्थितस्य ।
गोपालकृष्णस्य विदारितास्ये
स्फूर्यात् पतन्ती मम दुग्धधारा ॥

(१२)

कारुण्यहेतोः पशुपाङ्गनानाम्
हैयङ्गवीनं प्रणयं च मुष्णन् ।
कुण्डं मनोग्रन्थिमपि प्रभिन्दन्
विश्वेश्वरः क्रीडतु मानसे मे ॥

(१३)

सर्पाधिराजस्य फणासहस्रे
नृत्यन्नचिन्त्येन महाजवेन ।
एकस्वरूपोऽपि सहस्ररूपी-
वालक्षितश्शौरिरुदेतु चित्ते ॥

(१४)

गोवर्धनं वामकरेण बिभ्र-
दन्येन हस्तेन गवां च कण्ठम् ।
कण्डूयमानस्मितशोभितास्य-
स्तिष्ठन्मुकुन्दो हृदि भासताम् मे ॥

(१५)

हैयङ्गवीनमपसव्यकरारविन्दे,
वामे तु हस्तकमले कलवेणुनालम्।
बिभ्रत्प्रसन्नवदनः पुरतो जनन्या-
स्तिष्ठन् पुराणपुरुषो हृदि मे चकास्तु ॥

(१६)

चौर्यार्जितेन वदनान्तरगूहितेन
हैयङ्गवीनकवलेन बृहत्तमेन।
बृंहत्कपोलयुगलो जननीसमीपे
तूष्णीं स्थितः स्फुरतु मे हृदि नीलबालः ।

--: ० :--

कदा स्यात्

(१)

अधृत्वा गदाशङ्खचक्राम्बुजादी-
नहर्नाथकोटिप्रभामप्रकाश्य ।
द्विहस्तेन मर्त्यस्वरूपेण गूढम्
व्रजे खेलति ब्रह्म साक्षादखण्डम् ॥

(२)

रणद्वेणुनिर्विष्टशोणाधरोष्ठ-
श्चलच्चिल्लिकामोहिताभीरयोषः ।
महेन्द्रोपलादर्शसंशोभिगण्डो
वरीवर्ति बालोऽखिलादर्शभूतः ॥

(३)

वनं वासयन् पुण्यमालासुगन्धै-
श्शिलां द्रावयन् दिव्यवंशीनिनादैः ।
जगन्मण्डयन्नङ्गसौन्दर्यवर्षै-
र्नरीनर्ति नन्दाङ्गनासूनुरुच्चैः ॥

(४)

शरण्यश्शिवब्रह्ममुख्यामराणाम्
चरण्यन् सुहृद्भिस्समं धेनुपृष्ठे ।
धरण्या दिशन् हर्षमङ्घ्रयोर्निवेशै-
ररण्यादिहायाति सायं मुरारिः ॥

(५)

मनोग्रन्थिनिर्भेदकेलीकटाक्षम्
महामोक्षलक्ष्मीतिरस्कारिहासम् ।
अनङ्गारिसम्मोहनश्यामलाङ्गम्
व्रजेशाङ्गनास्नेहसर्वस्वमीडे ॥

(६)

रहोमञ्जुकुञ्जे व्रजस्त्रीसमूहै-
स्सहोदारलीलं वितन्वद्दयार्द्रम् ।
अहोरात्रमाम्नायवाक्यैर्विमृग्यम्
महो नैष्ठिकाग्रेसरं भावयेऽहम् ॥

(७)

स्वरब्रह्मपीयूषयूषाभिवर्षम्
व्रजस्त्रीपरप्रेमलाभाभिलाषम् ।
कलिन्दात्मजासैकते लीयमानम्
गुणातीतमेकं भजे नीलिमानम् ॥

(८)

लसत्किङ्किणीक्षौमकौपीनमध्यम्
निकूजत्तुलाकोटिपादारविन्दम् ।
मृदुस्मेरलीलावलोकार्द्रवक्त्रम्
भजे प्रावृडम्भोदनीलं किशोरम् ॥

(९)

दुरूहेण मार्गेण जीवान् नयन्तं
सुखं वा शुचं वा हितायैव तेषाम् ।
दिशन्तं दयासिन्धुमार्तैकबन्धुम्
भजे नन्दसूनुं सतां कामधेनुम् ॥

(१०)

व्रजस्त्रीजनाल्लब्धहैयङ्गवीनम्
प्रभुज्यातिसंहृष्टमुच्चैर्हसन्तम्　　।
कराम्भोरुहद्वन्द्वमास्फोटयन्तम्
नटन्तं भजे भूमिमाकम्पयन्तम् ।।

(११)

अशेषेषु जीवेषु हृद्वृत्तिचारम्
कलिन्दात्मजाभूषु राधादिजारम् ।
व्रजे दुग्धहैयङ्गवीनादिचौरम्
भजे चारुलीलं यशोदाकिशोरम् ।।

(१२)

स्मितश्रीविनिर्धूतमोहान्धकारम्
स्वनद्वेणुनिष्यन्दिपीयूषधारम्　　।
दयासिन्धुवीचीप्लवन्नेत्रतारम्
सदाराधये पूर्णपुण्यावतारम् ।।

(१३)

उदञ्चन्तमाभीरपुण्याम्बुराशे-
र्निषिञ्चन्तमानन्दपीयूषयूषम्　　।
विरिञ्चाक्षिनीलोत्पलानां विमृग्यम्
प्रपञ्चातिगं कञ्चिदिन्दुं प्रपद्ये ।।

(१४)

शिरोजाञ्चितोत्फुल्लमालाशिखण्डः
कराम्भोरुहारूढवंशीप्रकाण्डः　　।
अपाङ्गोन्मिषच्चारुशृङ्गारभावः
स्फुरत्वन्तरप्राकृतश्चित्प्रभावः　　।।

(१५)

विपर्यासतो न्यस्तमञ्जीरपादो
मदालस्यतो भुग्नकाञ्चीनितम्बः ।
विलासेन साचीकृतास्येन्दुबिम्बो
हृदि क्रीडताद्वेणुगोपालबालः ॥

(१६)

यथार्थे वरीवर्ति कालयत्रे य-
स्समर्थो भवेद्बन्धनिर्मोचने यः ।
पुमर्थस्वरूपेण भायात्सतां यः
पदार्थस्स मे नीलवर्णो गतिः स्यात् ॥

(१७)

कलिन्दात्मजायां कदम्बद्रुमूले
त्रिभङ्ग्या स्थितं वक्त्रविन्यस्तवंशम् ।
शिखण्डाञ्चितस्निग्धकेशं ममाक्ष्णो-
रखण्डं परं ब्रह्म दृश्यं कदा स्यात् ॥

--: ० :--

ध्यानश्लोकमञ्जरी

(१)

मेघश्यामतनुं तडिन्निभपटं कञ्जाभिरामेक्षणम्
शङ्खाम्भोजगदादिशोभितचतुर्बाहुं प्रसन्नानम् ।
काञ्चीकौस्तुभमौलिनूपुरवनस्रक्कुण्डलैर्मण्डितम् ।
कारायां कृपयावतीर्णमखिलब्रह्माण्डनाथं भजे ।।

(२)

नागेन्द्रस्य मणिप्रभूषितफणाछत्रावलीनामधो
रेजे श्रीवसुदेवपाणिपुटके स्वैरं शयानश्शिशुः ।
नक्षत्रैस्समलङ्कृतस्य नभसो वीथेरधस्तात् समु-
न्नीलत्कैरविणीकरे निपतितो बालद्विरेफो यथा ।।

(३)

उत्तुङ्गे हतपूतनोरसि मृदुस्मेराननो निर्भय-
श्शीतापाङ्गविलोकनश्शुभललाटोल्लासिलम्बालकः ।
श्यामाङ्गो गिरिमूर्ध्नि बालशशिवत् पादौ करौ च क्षिपन्
सानन्दं विहरन् हरिः स्फुरतु मे गोपीजनैश्चुम्बितः ।।

(४)

फालैजत्कुटिलालकस्सुरुचिरापाङ्गो यशोदागृहे
रत्नस्थण्डिलमण्डनः परिलसद्गण्डस्थलीमण्डलः ।
अभ्यस्यन् सकुतूहलं स्मितकलां मातुस्सकाशान्मुहुः
पातूत्तानशयस्समाध्यतिशयस्वादुः श्रुतेराशयः ।।

(५)

मातुस्तल्पे शयानं चरणसरसिजं मन्दमुन्नीय दोर्भ्याम्
वक्त्रस्यान्तः प्रवेश्य स्तनमिव परमप्रीतिपूर्वं धयन्तम् ।
लालाम्भस्तीर्थयूषं स्मितकिरणसुधां स्निग्धलीलाकटाक्षान्
सानन्दं स्यन्दयन्तं व्रजकृततपसां पूर्णपाकं स्मरामि ॥

(६)

नन्दस्त्रीशिशिराङ्कसीमनि निषिद्यैकं तदीयं स्तनम्
कारुण्येन धयन् परन्तु मृदुना हस्तेन सम्मर्दयन् ।
तस्यास्स्मेरमुखं प्रसादविकसद्दृग्भ्यां समालोकयं-
स्तस्यै मुक्त्यतिशायि निस्तुलरसं यच्छन्मुकुन्दोऽवतु ॥

(७)

उत्सङ्गे नन्दपत्न्यास्ससुखमुपविशन्स्तन्यपानं प्रकुर्वन्
मध्ये मध्ये विरम्य प्रमदभरवशात् सुप्रसन्नास्यबिम्बः ।
उन्मीलन्मन्दहासः स्फुटदधरपुटो दर्शयन्धौतदन्ता-
नम्बास्ये दत्तदृष्टिः प्रकटितकरुणः पातु मां विश्वनाथः ॥

(८)

बाल्यश्रीपरिरब्धसुन्दरतनुं माहेन्द्रनीलत्विषम्
कान्त्या मोहितमन्मथं मुरलिकापिच्छादिभिर्लाञ्छितम् ।
स्मेरोदारविलोकनेन हृदयग्रन्थेर्बलाद्दारकम्
ध्यायामो हृदि नन्ददारशिशिरोत्सङ्गस्थितं दारकम् ॥

(९)

मातुः पार्श्वे शयित्वा स्फुरदधरपुटेनास्थया स्तन्ययूषम्
कर्णाभ्याञ्चात्ततृष्णम् सरसशुभकथास्सम्पिबन्यामिनीषु ।
मन्दं स्निग्धेन तस्याः किसलयमृदुना पाणिना ताडितोरु-
र्निद्राक्रान्तो निरीहो मुकुलितनयनश्चाभवन्नित्यबुद्धः ॥

(१०)

आताम्रं मृदुलं च जानुयुगलं वामं करं च क्षितौ
न्यस्यन् दक्षिणपाणिना प्रतिभटं वत्सं बलाद्वारयन् ।
स्थित्वाधो, मुखमुन्नमय्य सुरभेः स्नेहस्नुतं सम्पिबन्
स्तन्यं तद्रसनावलीढजघनो राराष्टु चित्ते शिशुः ॥

(११)

रिङ्गन्नन्दवधूगृहेषु करयोर्जान्वोर्युगाभ्यां मुदा
सुस्मेरं शतपत्रचारुनयनं कादम्बिनीसुन्दरम् ।
स्वस्याङ्गं प्रतिबिम्बितं मणिमये तत्कुट्टिमे प्रस्फुटम्
दृष्ट्वा मोहितधीस्तदाशु बहुशश्चुम्बञ्छिशुर्भातु मे ॥

(१२)

स्वान्ते राजतु कोऽपि चापलनिधिर्गोपीजनान्हासयन्
कात्स्न्येनाखिलपत्यपत्यसुहृदां वृत्तानि विस्मारयन् ।
आनन्देन विलङ्घतस्तत इतो वत्सस्य पुच्छे बला-
द्वालम्ब्य स्मयमानवक्त्रकमलो दोलायमानश्शिशुः ॥

(१३)

भूमावर्पितपाणिजानुयुगलस्यार्कं नमस्कुर्वतः
श्रद्धालोर्जनकस्य पृष्ठमधिरुह्यावस्थितस्सस्मितम् ।
रे रे मत्तगज ! द्रुतं चल चलेत्याज्ञापयन्नोजसा
तं भूयः प्रहरन् करेण च पदा चाव्याद्व्रजेशात्मजः ॥

(१४)

प्रातः श्रुत्वा मनोज्ञं दधिमथनरवं तूर्णमुत्थाय धावन्
मथ्नन्त्या नन्दपत्न्या निकटमुपगतस्स्वादुहैयङ्गवीने ।
दध्नो निष्पद्यमाने कृतबहुकुतुकं दत्तदृष्टिः स्मितास्यः
पाणी सन्दर्श्य तिष्ठन्विहरतु हृदि मे सर्वलोकैकनाथः ॥

(१५)

आताम्रे मृदुपाणिपद्मयुगले गोपालनारीजनै-
र्वात्सल्येन समर्पितं सुमधुरं हैयङ्गवीनं वहन् ।
आनन्देन हसन् मुखं विकसयन् दन्ताङ्कुरान्दर्शयन्
मञ्जीरं क्वणयन्नटन्नतितरां गर्जन् हरिः पातु माम् ॥

(१६)

एकस्मिन्सुकुमारपाणिकमले चेतोहरां वंशिका-
मन्यस्मिंश्च नवोद्धृतस्य कवलं बिभ्रन्मनोज्ञं हसन् ।
रत्नालङ्कृतदेहकान्तिकिरणैस्सर्वा दिशश्शोभय-
न्नुत्सङ्गे पशुपालराजसुदृशः पायान्निषण्णश्शिशुः ॥

(१७)

सीराङ्काय तदीयहैमचषके मात्रा प्रमादात्कदा-
प्याहारे परिवेषिते प्रथमतस्सद्यो महामन्युना ।
सन्दष्टोष्ठपुटो विजृम्भितमुखो गर्जन् निजं भाजनम्
क्षिप्त्वोत्थाय रुदन् प्रधाव्य विजने लीनश्शिशुर्मे गतिः ॥

(१८)

वंश्या कौस्तुभकर्णपूरवलयैर्निष्केण मुक्ताफलै-
र्मञ्जीरैर्वनमालया रशनया पिच्छेन पुण्ड्रेण च ।
मात्रा सम्यगलङ्कृतं निजवपुर्निर्वर्णयन् दर्पणे
तृप्तिं प्राप्य शिरः प्रकम्प्य सुमुखो जातश्शिशुर्भातु मे ॥

(१९)

अम्बां दुःस्सहमस्तकज्वररुजा शय्यावलम्बां कदा-
प्यालोक्य स्वकराङ्गुलीकिसलयैस्तस्या ललाटान्तरे ।
स्निग्धं शीततरं हिमाम्बुकलितं निर्यन्महासौरभम्
सान्द्रं चन्दनलेपनं करुणया लिम्पन् हरिः पातु माम् ॥

(२०)

प्रातर्धेनुं दुहन्त्याः प्रणयजलनिधेर्नन्दपत्न्यास्समीपे
नानालङ्कारयुक्तः परमकरुणयोपात्तकैशोरगात्रः ।
हस्तेनैकेन हैमं सुरुचिरचषकं पाणिनान्येन पाशम्
गोवत्सस्यापिगृह्णन् स्मितमधुरमुखस्तस्थिवान् पातु कृष्णः ।।

(२१)

गूढं सर्वनिशासु गोपसुदृशां पुण्यान् गृहान्निर्विश-
न्नुच्चैर्लम्बितशिक्यसंस्थकलशस्याधस्तले लुब्धधीः ।
ऊर्ध्वं वीक्ष्य करं प्रसार्य बहुशश्चोत्पत्य बद्धश्रम-
स्तिष्ठन् गोरसचोरणे प्रतिहतः पायाद्दयासागरः ।।

(२२)

हर्तुं भोक्तुं च वाञ्छन् व्रजयुवतिगृहं सम्प्रविश्योर्ध्वदृष्टि-
शिक्यस्थानां घटानां प्रतिवननवनीतादिगव्योदराणाम् ।
अत्युच्चैर्लम्बितानां निजलघुकरयोर्दुर्गमानामधस्ता-
त्तिष्ठन्कर्तव्यमूढः स्फुरतु हृदि शिशुः क्रान्तलोकत्रयो नः ।।

(२३)

शर्वर्यां प्रतिपालयन्नवसरं हर्तुं रहो गोरसम्
गाढध्वान्तविजृम्भिते व्रजवधूगेहस्य कोणे क्वचित् ।
आसीनस्सुचिरं नितान्तविवशः श्रान्तोऽवसाने पुन-
र्निद्रामीलितलोचनाब्जयुगलो जातश्शिशुः पातु माम् ।।

(२४)

साशङ्कं वल्लवीनां भवनमनुविशंस्तुङ्गपीठाधिरूढः
प्रोच्चैर्व्यालम्बिशिक्ये निहितमभिनवं भूरि हैयङ्गवीनम्
आदायादाय शीघ्रं परमकरुणया पाणियुग्मेन यच्छन्
निर्लोभं वानरेभ्यो लसतु मनसि मे मुक्तहस्तो मुरारिः ।।

(२५)

त्वां द्रष्टुं विधिरागतो बहिरिति स्निग्धेन विज्ञापितः
काकेभ्यो दधिरक्षणे नियमितो मात्रेह तिष्ठाम्यहम् ।
नैवेतश्चलनाय मेऽस्त्यवसरस्स श्वः परश्वोऽपि वा-
त्रागच्छत्विति निर्भयं प्रतिवदन् कृष्णो मम स्याद्गतिः ।।

(२६)

मञ्जीरं पदयोश्शिखण्डमलके पुण्ड्रं ललाटान्तरे
वेत्रं वामकरे मनोज्ञमुरलीं हस्ताम्बुजे दक्षिणे ।
शिक्यं स्कन्धतटे च बिभ्रदतसीनीलप्रभो बालकः
कश्चिद्याति सुहृज्जनैस्सह पुरस्कुर्वन् पशूनां कुलम् ।।

(२७)

प्रातर्भुक्त्वा यथेष्टं पशुपपरिवृतश्शिक्यमन्नादिपूर्णम्
दोर्मूले लम्बयित्वा ललितमुरलिकामोष्ठबिम्बेन चुम्बन् ।
वत्सानग्रे विमुञ्चन् मृदुहसितयुतैश्शीतलापाङ्गपातै-
स्सर्वान्देशान्निषिञ्चन् सरसिजनयनो याति वृन्दावनाय ।।

(२८)

प्रातर्गोचारणार्थं प्रियसखसहितः काननान्ताय गच्छन्
स्थूणापृष्ठे निलीनां विरहपरवशां निर्गलद्बाष्पधाराम् ।
राधां स्नेहेन दूरात्सकृदपि च परावृत्य नेत्राञ्चलाभ्याम्
पश्यन्नापादचूडं सपदि पुलकयन्नन्दजो भातु चित्ते ।।

(२९)

मित्रैस्सम्मिल्य कृष्णापुलिनभुवि चरन् धेनुबृन्दानि रक्षन्
नर्मालापान् वितन्वन् प्रमदभरवशादुच्चहासं विमुञ्चन् ।
वंशीनाल्या प्रगायन् करतलकमलद्वन्द्वमास्फोट्य नृत्यन्
घोषध्वानेन काष्ठास्सुबहु मुखरयन् भातु हृद्यम्बुजाक्षः ।।

(३०)

निर्यन्नीलाङ्गशोभस्तरुणपरिमलप्रोन्मिषद्वन्यमालो
व्यालोलत्पीतचेलस्वरसपरिगलत्स्मेरलीलावलोकः ।
चञ्चच्चिल्लीविलासः कलकलनिनदन्मञ्जुमञ्जीरपादः
कश्चिन्मार्तण्डपुत्रीतटनटनकलालालसो लालसाति ॥

(३१)

सायाह्ने निजपार्षदैस्सह बहून्वत्सान्पुरश्चारयन्
वंशीमोष्ठपुटे निवेश्य मधुरं गायन् भ्रुवौ स्पन्दयन् ।
स्मेरापाङ्गविलोकनानि विकिरन् मञ्जीरकं शिञ्जयन्
मन्दं गोकुलमाव्रजन्वनतलात् पायाद्यशोदात्मजः ॥

(३२)

वृक्षाणां निकरे निलीय मधुरोदारान् निजान्विभ्रमान्
सानन्दं नयनैर्निमेषरहितैरास्वादयन्तीः स्थिताः ।
रागान्धाश्शबराङ्गनाः प्रतिपदं पश्चात्समालोकयन्
मन्दं नन्दसुतः प्रदोषसमये वृन्दावनाद्गच्छति ॥

(३३)

शृङ्गं वेत्रं च कक्षे घृतमयकवलं पाणिपद्मे नितम्बे
वंशीनालं च बिभ्रत्सहचरसुहृदां मण्डले मध्यसंस्थः ।
स्मेरास्यः फुल्लनेत्रः प्रतिनिमिषनवैर्नर्मभिर्हासयंस्तान्
स्वर्लोके वीक्षमाणे प्रणयपरवशो भक्षयन् भातु कृष्णः ॥

(३४)

हरब्रह्मादीनां विकचनयनाब्जैर्नमसितः
परानन्दोत्सिक्तैस्सहचरसुहृद्भिः परिवृतः ।
तरुच्छायाशीते तपनदुहितुः स्वच्छपुलिने
सुखासीनो नर्मालापनरसिकोऽभुङ्क्त भगवान् ॥

पादोपसर्पणम्

(१)

चिकुरे बहुलं निटिले विपुलम्
नयने शिशिरं श्रवणे रुचिरम् ।
रदने धवलं हसिते मृदुलम्
कमपि स्मर हे धिषणे, पृथुकम् ॥

(२)

अधरे मधुरं वचने सरसम्
वदने सुभगं हृदये गहनम् ।
चरणे ललितं गमने सरलम्
कमपि स्मर हे धिषणे पृथुकम् ॥

(३)

प्रणतार्तिहरे प्रणयाम्बुनिधौ
व्रजराजसुते पुरतः स्फुरति ।
अपरं कमुपाश्रयितुं स्पृहय-
स्यविवेकबलादयि जीवकले ? ॥

(४)

न पिता न पतिर्न सुतो न सखी
न धनं न वयो न च रूपचयः ।
भविता शरणं मरणावसरे
हरिमेव ततो भज जीवकले ॥

(५)

महनीयमिदं निजमर्त्यजनु-
र्भगवच्चरणस्मरणेन विना ।
विफलं गतमित्युरुवेदनया
किमु न व्यथते तव जीव, मनः ? ॥

(६)

अवशेषितजीवितकाललवान्
भगवद्भजनैश्चरितार्थयितुम् ।
कुतुकं कलयन्नुपयाहि शनै-
रयि जीव, तदीयपदाम्बुरुहम् ॥

(७)

पतितं दुरिताचरणैः कठिनै-
रहितं रहितं शरणैरितरैः ।
पतितं चरणाम्बुजयोस्तव हे
करुणाकर, पालय जीवमिमम् ॥

--: ० :--

भावनापञ्चकम्

(१)

ऊर्ध्वपुण्ड्रालिकं बद्धबर्हालकम्
स्निग्धनेत्राञ्चलं मुग्धमन्दस्मितम् ।
चञ्चलद्भ्रूलतं प्रस्फुरत्कुण्डलम्
कौस्तुभश्रीगलं बालकं भावये ॥

(२)

वन्यमालोरसं वेणुनालीकरम्
पीतचेलोदरं हैमकाञ्चीकटिम् ।
नूपुराङ्घ्रिद्वयं नीरदश्यामलम्
भक्तनेत्रामृतं बालकं भावये ॥

(३)

पादपद्मार्पणैः पावयन्तं धराम्
सस्मितालोकनैर्हर्षयन्तं सखीन् ।
वेणुगीतामृतैर्द्रावयन्तं शिलाम्
धेनुपालाङ्गजं बालकं भावये ॥

(४)

वेदवेदान्तशास्त्रागमान्वेषितम्
राधिकादोर्लतापल्लवाच्छादितम् ।
भक्तिवैवस्वतीस्निग्धकुञ्जस्थितम्
शक्रनीलत्विषं बालकं भावये ॥

(५)

सिद्धमुक्तादिभिर्गेयदिव्याकृतिम्
ब्रह्मरुद्रादिभिर्ध्येयपादद्वयम्   ।
गोपगोपीजनैः   पेयवक्त्राम्बुजम्
कञ्चिदत्यद्भुतं   बालकं भावये ।।

--: ० :--

आत्मनिवेदनम्

(१)

दुरिततिमिरभारं सर्वसंसारतापम्
निजरुचिरमयूखैर्दीप्रशीतैर्विधुन्वन् ।
दरविकचमदीयस्वान्तपाथोजगर्भे
स्फुरति निगममृग्यः कोऽपि नीलप्रकाशः ॥

(२)

श्रुतिभिरनभिधेयं मेधया नानुमेयम्
विधिमुखपरिगेयं धेनुलक्षानुपेयम् ।
व्रजयुवतिविधेयं मेदिनीभागधेयम्
स्मर तदनुपमेयं वैष्णवं रूपधेयम् ॥

(३)

जलदसुभगगात्रं मन्दहासार्द्रवक्त्रम्
नलिनरुचिरनेत्रं हस्तसंशोभिवेत्रम् ।
कृतमधुरचरित्रं गोपिकाप्रेमपात्रम्
सकलभुवनमित्रं चिन्तये नन्दपुत्रम् ॥

(४)

विगलितजनिनाशं वृक्णसंसारपाशम्
दलितहृदयकोशं सूर्यकोटिप्रकाशम् ।
विहसदधरदेशं चञ्चलत्पिच्छकेशम्
क्वणितललितवंशं भावये राधिकेशम् ॥

(५)

रुचिरचिकुरभारे बद्धबर्हप्रसूनम्
विकसदधरबिम्बे न्यस्तवेणुप्रकाण्डम् ।
ललितचरणपद्मे कीर्णमञ्जीरनादम्
कमपि मरणकाले बालमालोकयानि ॥

(६)

निखिलनिगमवाचां मार्गणैकान्तलक्ष्यो
द्रुहिणहरमुखानां भावनामात्रगम्यः ।
पशुपकुलवधूनां प्रेमसर्वस्वभूतो
मम नयनपदव्यां भासतां वासुदेवः ॥

(७)

चिकुरघटितपिच्छो वक्त्रविन्यस्तवंशः
स्फुरितललितहासः कामकोटिप्रकाशः ।
विरहपरवशानां गोपिकानां पुरस्तात्
प्रकटितयुववेषः पातु लोकत्रयेशः ॥

(८)

स्मितकिरणविभातः पूर्णकारुण्यशीत-
स्त्रिजगदुदयहेतुस्सर्वसद्धर्मसेतुः ।
पशुपयुवतिभोग्यो ब्रह्मरुद्रादिमृग्यो
भवविदलनदक्षः पातु कश्चित्कटाक्षः ॥

(९)

मयि निपततु नित्यं रुद्धधारावशेष-
स्सुजनकुमुदपोषस्सर्वसन्तापशोषः ।
मधुमथनकटाक्षो मन्दहासाभिराम-
श्शशभृदमृतवृष्टिश्चन्द्रिकोल्लासितेव ॥

(१०)

स्मितलसदधरोष्ठे　　　कुण्डलोद्भासिकर्णे
मुकुरविमलगण्डे　　　नित्यलावण्यपूर्णे　।
व्रजयुवतिमनोज्ञे　　　भक्तलोकाधमर्णे
विहरतु मम चित्तं ब्रह्मणि श्यामवर्णे ॥

(११)

रुचिरचिकुरजाले　　　कन्धरालम्बिमाले
तिलककलितफाले　　　चञ्चलापीतचेले　।
सजलजलदनीले　　　गोरसस्तेयशीले
व्रजविहरणलोले स्वान्त! सज्जस्व बाले ॥

(१२)

हरिदुपलकपोले　　　पञ्चमीचन्द्रफाले
नवकनकदुकूले　　　भक्तचित्तानुकूले　।
करतलधृतशैले　　　सर्वलोकैकपाले
निखिलनिगममूले जीव लीयस्व बाले ॥

(१३)

त्रिविधकरणशुद्धिर्धर्मनिष्ठाभिवृद्धिः
प्रणिधिनिपुणबुद्धिर्योगसिद्धिर्न मेऽस्ति　।
अनितरशरणोऽहं　दीनबन्धो!　त्वदीये
चरणनलिनमूले　दण्डपातं　पतामि ॥

(१४)

अविदितमखिलानां साक्षिणस्ते न हि स्या-
न्न च कुहचिदशक्यं सर्वशक्तस्य ते स्यात्　।
न खलु कठिनता ते विश्वबन्धोर्हरे स्या-
दिति मनसि विविच्य प्रार्थनामुत्सृजामि ॥

—: ० :—

त्रिमूर्तिः

(१)

चारं चारं यामुने रम्यतीरे
पोषं पोषं गोधनं धन्यधन्यम् ।
गायं गायं वेणुना मञ्जुगीतम्
खेलं खेलं मोदते नन्दसूनुः ॥

(२)

आरुण्यश्रीलाल्यमानाङ्घ्रिमूल-
स्तारुण्यश्रीश्लिष्यमाणाखिलाङ्गः ।
लावण्यश्रीचुम्ब्यमानाननाब्जः
कारुण्यश्रीचाल्यमानेक्षणोऽयम् ॥

(३)

दर्शं दर्शं वन्यशोभासमृद्धिम्
हासं हासं नर्मसम्भाषणेन ।
क्रीडं क्रीडं पार्षदैर्गोपबालै-
र्मादं मादं सञ्चरत्यम्बुजाक्षः ॥

(४)

पादस्पर्शैः पावयन् पांसुपूरम्
लीलालोकैर्मोहयन् प्राणिजालम् ।
वेणुक्वाणैर्हर्षयन् योगिवृन्दम्
वृन्दारण्ये खेलति श्रीमुकुन्दः ॥

(५)

केरं केरं वेणुना चारुगीतम्
हारं हारं योगिनां धीरचित्तम् ।
छेदं छेदं देहिनां कर्मबन्धम्
तोषं तोषं स्वात्मनि क्रीडतीशः ॥

(६)

आशावल्लीकन्दमापद्गणानाम्
शृङ्गारश्रीकन्दलं गोपिकानाम् ।
श्रेयोलक्ष्मीमन्दहासं मुनीनाम्
वन्दे कञ्चित्सुन्दराङ्गं कुमारम् ॥

(७)

लोकालोकं पालिताशेषलोकम्
लीलालोकं शोषितप्राणिशोकम् ।
गोगोपीनां भागधेयातिरेकम्
ध्यायाम्येकं सच्चिदानन्दतोकम् ॥

(८)

वन्दे कृष्णाकूलकुञ्जे निषण्णाम्
चिन्तामग्नां राधिकां मन्दमन्दम् ।
पृष्ठे गत्वा पक्ष्मणोः स्वङ्गुलीभि-
र्गाढं बद्ध्वा प्रीणयन्तं कुमारम् ॥

(९)

लक्ष्मीकान्तं वृत्रभिन्नीलकान्तम्
भक्तैकान्तं तन्मनोदर्पकान्तम् ।
गोपीज्योत्स्नाप्रद्रवच्चन्द्रकान्तम्
वन्दे सच्चिन्मूलकन्दं मुकुन्दम् ॥

(१०)

उच्चैस्फूर्जच्चण्डमोहान्धकारो
माद्यन्नृत्यत्कामलोभाशरौघे ।
जीवव्रातस्यान्तरङ्गार्धरात्रे
प्रादुर्भूतं दीप्रतेजः स्मरामि ॥

(११)

आलम्बेऽहं बाललीलाविलोलाम्
लोलम्बाभां कन्धरालोलमालाम् ।
मुग्धाकारां काञ्चनाकल्पशारा-
मात्माधारां काञ्चनानन्दधाराम् ॥

(१२)

धर्मौघः किं सन्निधिः किं सुखं किम्
कैवल्यं किं भक्तनेत्रोत्सवः किम् ।
इत्थं लोकैश्चित्रधोत्प्रेक्ष्यमाणाम्
काञ्चित्कृष्णातीरलक्ष्मीं स्मरामि ॥

(१३)

चार्वाकाणां केवलाकाशपुष्पम्
भक्तालीनां चिन्मधुस्यन्दिपद्मम् ।
कामादीनां क्रूरकण्ठे कुठारम्
पादद्वन्द्वं नन्दपुत्रस्य वन्दे ॥

(१४)

योगीन्द्राणां धारणाध्यानलक्ष्यम्
वेदान्तानां सारसर्वस्वभूतम् ।
धर्मादीनां श्रेयसमादिमूलम्
वन्दे विष्णोः पावनं पादमूलम् ॥

(१५)

स्वैरं गोभिर्जिह्वया लिह्यमानम्
चञ्चद्घोषब्रह्मघोषैः प्रघुष्टम् ।
ब्रह्मेशाद्यैर्दूरतो वन्द्यमानम्
कञ्चित्पादं गोकुलस्थं नमामि ॥

(१६)

अग्रे पश्याम्यर्भकं पिच्छचूडम्
वंशीहस्तं मञ्जुमञ्जीरपादम् ।
मुग्धस्मेरश्रीमुखं चारुनेत्रम्
स्निग्धप्रावृण्नीरदश्यामलाङ्गम् ॥

--: ० :--

नन्दकिशोरः

(१)

लीलारसेन नितरां रमयम् समाधे-
रभ्यासतो विरमयंश्च मनो मुनीनाम् ।
कृष्णातटे चरति कोऽप्यतिसुन्दराङ्गो
बालस्त्रयीमकुटकोटिगवेषिताङ्घ्रिः ॥

(२)

मायाटवीं सुभगयंश्चरणाब्जचिह्नै-
र्वेदश्रुतिं मधुरयन् मुरलीनिनादैः ।
गोपीतनुं पुलकयन् करुणाकटाक्षैः
कृष्णातटे विहरति स्मरकोटिरम्यः ॥

(३)

आनन्दमन्दहसितः करुणाकटाक्षः
प्रोन्मीलदूर्ध्वतिलकश्शिखिपिच्छचूडः ।
आलोलपादकटकः कलवेणुनादः
कादम्बिनीसुरुचिरश्शिशुराश्रयो नः ॥

(४)

वृन्दावने कठिनकण्टकशर्करासु
विन्यस्य पादकमलं विधिरुद्रवन्द्यम् ।
लोकत्रयैकशरणं कृपयाऽचरद्य-
स्सेवे तमौपनिषदं परमं पुमांसम् ॥

(५)

वृन्दावनेषु निगमेषु च सञ्चरन्तम्
गोमण्डलानि भुवनानि च पालयन्तम् ।
क्षीरं मनोमलचयं च रहो हरन्तम्
बालं पुराणपुरुषं च कमप्युपासे ।।

(६)

गोवत्सपादति गभीरभवाम्बुराशिः
खद्योतकीटति विरिञ्चिकिरीटभानुः ।
मुक्तावतंसति निकृष्टतृणाङ्कुरादि-
र्यत्पादमूलपरमाणुषु तं भजामि ।।

(७)

लालित्यपाणिपरिलालितपादमूलम्
माधुर्यवक्त्रपरिचुम्बितगण्डदेशम् ।
कन्दर्पचित्तचिरकामितदेहभागम्
वेदश्रुतिस्वदितवेणुरवं प्रपद्ये ।।

(८)

हालाहलं कुटिलपूतनया प्रदत्तम्
दावानलं विपिनदेवतया वितीर्णम् ।
स्तन्यामृतं व्रजनृपाङ्गनयार्पितं च
सानन्दमभ्यवहरन्तमुपैमि बालम् ।।

(९)

फालप्रणीततिलकं चिकुरानुबद्ध-
बर्हप्रसूनमधरार्पितवेणुनालम् ।
कर्णोज्वलन्मकरकुण्डलमङ्घ्रिशोभि-
मञ्जीरमेकमतिसुन्दरबालमीडे ।।

(१०)

संसारसंज्ञितमहीरुहवेधदक्ष-
मेकान्तभक्तहृदयाम्बुजकोशबद्धम् ।
तापिच्छनीलवपुषं कलवेणुनादम्
गोपीस्तनन्धयसुमन्धयमर्चयामि ॥

(११)

पापापहारिपरिपावननामधेयम्
तापापनोदनमनोहररूपधेयम् ।
आपादमस्तकविभूषणभूषिताङ्गम्
गोपालराजतनयं प्रणिधेहि देहिन् ॥

(१२)

सुस्मेरकैरवसुगन्धिनि जह्नुकन्या-
संस्नानशीतलतरे मकरन्दपूर्णे ।
कृत्स्नामयप्रशमने नखरेन्दुबिम्ब-
ज्योत्स्नामये हरिपदे धिषणे रमस्व ॥

(१३)

वृन्दावनेषु यमुनापुलिनोदरेषु
गोवर्धनाद्रिशिखरेषु च सञ्चरन्तम् ।
गोसञ्चयं प्रियसखैस्सह चारयन्तम्
वेणुं कलं विरणयन्तमनुस्मरामि ॥

(१४)

भ्रूकम्पसूचितविपन्नजनानुकम्पम्
दोर्दण्डनिर्मथितराक्षसदैत्यषण्डम् ।
चामीकराभवसनं रुचिराङ्गलक्ष्म्या
श्यामीकृताखिलदिशं कलये मुकुन्दम् ॥

(१५)

लोलम्बनीलवपुषं शरदिन्दुवक्त्रम्
लालाभिषिक्तमधुराधरमच्छहासम् ।
लीलानुकूलकमनीयकिशोरवेषम्
लोलायते मम विलोकयितुं दृगीशम् ॥

(१६)

शिञ्जाननूपुरपदात् कलवेणुहस्तात्
पिच्छावतंसितकचाद् घननीलगात्रात् ।
मन्दस्मिताञ्चितमुखात्करुणार्द्रनेत्रा-
न्नन्दात्मजान्न परमीश्वरमाश्रयामि ॥

(१७)

रोगोऽस्ति शत्रुभयमस्ति विमाननास्ति
मूर्खत्वमस्ति खलतास्ति दरिद्रतास्ति ।
सर्वं च मेऽस्ति भगवंस्तव पादमूल-
च्छायां विहाय शरणं न विलोकयामि ॥

(१८)

पापश्शुचिर्भवति दुष्टमतिस्सुचित्तो
मूढो विवेचनपटुर्विषयी विरक्तः ।
क्षुब्धः प्रशान्तकरणो भवभाग्विमुक्त-
श्शुष्कश्च भक्तिरसिको भगवत्प्रसादात् ॥

(१९)

वंशीधरस्य नवनीरदसुन्दरस्य
पीताम्बरस्य बलरामसहोदरस्य ।
पद्मोदरारुणपदस्य परात्परस्य
दामोदरस्य करुणाऽवतु मां चिरस्य ॥

(२०)

नव्याम्बुदाभमुरसा धृतशुभ्रहारम्
भव्यार्कजातटनिकुञ्जरहोविहारम् ।
अव्याजकारुणिकमद्भुतमन्दहास-
मव्यात्त्रयीवचनमृग्यमहामहो नः ॥

(२१)

जानुद्वयेन विचरन् व्रजधाम्नि पश्चा-
दासेदुषीं स्वजननीमसकृत् स्मितार्द्रैः ।
तिर्यङ्निरीक्षणरसैर्दिविषद्दुरापै-
स्सम्भावयन्नवतु मां पुरुषः पुराणः ॥

(२२)

संवीक्ष्य यत्समकुचत्तुहिनांशुबिम्बम्
वैवर्ण्यमाप सुतरामपवर्गलक्ष्मीः ।
मूर्च्छां गतास्सकलगोकुलजीववर्गा-
स्तद्दिव्यसुन्दरमुखं हृदि भासतां मे ॥

(२३)

गोपाङ्गनाकुमुदिनीक्षणदृष्टपूर्वा
वंशीचकोरतरुणीमुखपीतशेषाः ।
कृष्णस्य शारदशशाङ्कमयूखगौरा
हासाङ्कुराश्शिशिरयन्तु ममान्तरङ्गम् ।

(२४)

मायामरुं नयति शाद्वलदेशतां या
या ज्ञानचण्डकिरणं शशिनं करोति ।
या भक्तचातकतृषां शमयत्यजस्रम्
सा श्यामिका मम चमत्कुरुतामपाङ्गम् ॥

(२५)

हस्तस्सरोजतु तवाङ्घ्रिनखेन्दुपङ्क्तौ
चक्षुश्चकोरतु तव स्मितचन्द्रिकायाम् ।
चेतो मयूरतु तवाङ्गमयूखमेघे
पापात्मनोऽपि मम कृष्ण, तव प्रसादात् ॥

(२६)

विद्यातपोऽध्ययनदानजपादयोऽन्ये
यद्योगतस्सफलतामुपयान्त्युपायाः ।
सद्यस्त्विमे स्युरफला यदसन्निधाना-
द्द्याद्धरिः स्वपदि तां रतिमेव मह्यम् ॥

(२७)

ये साधुगर्हणमभीष्टविनोदयन्ति
ये गेहकूपपतनं पुरुषार्थयन्ति ।
ये मोहपाशरचनामपवर्गयन्ति
तैस्सङ्गतिर्मम कदाचन नाथ माभूत् ॥

—: ० :—

भुजङ्गप्रयातम्

(१)

खलानां हृदि त्रासस्म्भ्रान्तकारी
सतां चेतसस्सर्वभीतिप्रणाशी ।
मृतानां स्वदंशैरमर्त्यत्वदायी
निशीथेषु कश्चिद्भुजङ्गः प्रयाति ॥

(२)

महामोहहालाहलग्रासदक्षो
बहुस्वादुकैवल्यपीयूषवर्षी ।
सदा कुण्डलिन्या समन्विष्यमाण-
सदानन्दरूपो भुजङ्गः प्रयाति ॥

(३)

हृदन्तर्गुहायां महागोगभाजाम्
सहस्रारदुर्गे च कैवल्यभाजाम् ।
निगूढं वसन् कोऽपि कृष्णाभिधानो
बहिर्मन्दमन्दं भुजङ्गः प्रयाति ॥

(४)

अजस्राविकारी स्वभक्तानुकम्पी
त्रयीमौलिचारी निकुञ्जाभिसारी ।
स्थिरब्रह्मचारी व्रजस्त्रीजनानाम्
भुजातल्पशायी भुजङ्गः प्रयाति ॥

(५)

अविद्यापदे कालपाशायमानो
व्रजस्त्रीगले स्वर्णसूत्रायमानः ।
त्रयीमस्तके रत्नमालायमानो
महाश्चर्य एको भुजङ्गः प्रयाति ।।

(६)

न मन्त्रैर्न तन्त्रैर्न दानैर्न गानै-
र्न सिद्धौषधीभिर्वशं प्रापणीयः ।
परप्रेममात्रेण संरोधनीयः
स्वतन्त्राग्रगण्यो भुजङ्गः प्रयाति ।।

(७)

सदा गानलोलः क्वचिन्नृत्यशीलो
मुनिस्वान्तसंक्षोभिशृङ्गारलीलः ।
अनादिस्थिरब्रह्मचर्यव्रतस्थः
स्वयंज्योतिरेको भुजङ्गः प्रयाति ।

(८)

गले कौस्तुभाख्यं धरन् पद्मरागम्
सरागं स्मरारातिनालिङ्गिताङ्गः ।
निशाचारशीलः पराच्छन्नमानो
रहः कोऽपि दिव्यो भुजङ्गः प्रयाति ।।

(९)

वियोगाग्निनिर्दग्धगोपालकन्या-
विनिश्वासशुद्धानिलाहारतृप्तः ।
वृहद्भोगयुक्तः स्वतो भोगशून्यो
नवाम्भोदनीलो भुजङ्गः प्रयाति ।।

(१०)

महर्षीश्वरैर्दण्डकारण्यभाग्भि-
र्विमुक्तो विरक्तैरपि प्रेमलुब्धैः ।
व्रजे गोपिकात्वं वरैर्लब्धवद्भि-
र्मुहुश्चुम्बितोष्ठो भुजङ्गः प्रयाति ॥

(११)

घनश्यामलाङ्गं त्रियामान्धकारे
स्फुरद्रत्नभूषां च खद्योतदीप्तौ ।
समाच्छाद्य कृष्णानिकुञ्जं विचिन्वन्
निगूढं व्रजस्त्रीभुजङ्गः प्रयाति ॥

(१२)

स्फुरत्पिच्छकेशश्चलद्भ्रूललाटः
कृपासार्द्रनेत्रो मृदुस्मेरवक्त्रः ।
गलद्गन्धमालो लसत्पीतचेलः
क्वणद्वेणुनालो भुजङ्गः प्रयाति ॥

(१३)

स्वगीतं समीरैः स्वगन्धं सुमौघैः
स्ववर्णं तमालैश्च सम्यङ्निगूह्य ।
खलानामलक्ष्यस्सतां त्वीक्षणीयः
परब्रह्ममूर्तिर्भुजङ्गः प्रयाति ॥

:o:

नामसङ्कीर्तनम्

(१)

कृष्णेति नन्दतनयेति जनार्दनेति
रामेति कामदहनेति षडाननेति ।
कालीति लोकजननीति सरस्वतीति
सङ्कीर्तयस्व रसने मधुराक्षराणि ॥

(२)

वैकुण्ठ केशव यदूद्वह वासुदेव
गोविन्द माधव मुकुन्द हरे मुरारे ।
तापिच्छवर्ण मुरलीधर पिच्छमौले
नारायणेति पिब नामसुधां रसज्ञे ॥

(३)

माणिक्यकुण्डलति यन्निगमान्तवाण्या
मङ्गल्यसूत्रति यदुत्तमभक्तिलक्ष्म्याः ।
कण्ठे कुठारति सदा यदघासुरस्य
जिह्वे तदेव जप माधवनामधेयम् ॥

(४)

जीवामृतं दुरितकाननरोहिताश्वम्
दुःखौषधं हृदयकैरवपार्वणेन्दुम् ।
मोहान्धकारमिहिरं परमानुराग-
रत्नाकरं जप जनार्दननामधेयम् ॥

(५)

पद्मासनेति गिरिशेति गदाधरेति
विघ्नेश्वरेति हरिशङ्करनन्दनेति ।
नामानि निर्गुणचिदक्षरगुम्फितानि
शश्वद्गलात् स्वरसतो मम निर्गलन्तु ॥

(६)

हे श्यामसुन्दर कलापविलासिकेश
गोपीमनोज्ञ मुरलीधर नन्दसूनो ।
वृन्दाटवीतिलक गोकुलबालचन्द्रे-
त्येवं प्रकीर्त्य कृतिनी रसना मम स्यात् ॥

(७)

नाथेति नारदनुतेति नरोत्तमेति
नारयणेति नलिनायतलोचनेति ।
नन्दात्मजेति नवनीरदसुन्दरेति
नद्याद्गले नरकसूदननामघोषः ॥

(८)

पापं क्षिणोति गलहस्तयते विषादम्
चेतः पुनाति विषये विरतिं ददाति ।
ज्ञानं प्रयच्छति समुद्धरते भवाब्धे-
र्भक्तिं परां दिशति चाच्युतनामगानम् ॥

(९)

उद्बोधनं सुचिरनिद्रितकुण्डलिन्या
विद्योतनं तिमिररुद्धमनोगुहायाः ।
निर्मोचनं त्रिगुणबद्धशरीरिणश्च
जेजीयते मुररिपोर्गुणनामगानम् ॥

(१०)

अलोडनस्वन इवाद्भुतयोगसिन्धो-
रुद्घाटनध्वनिरिवामृतपेटकस्य ।
मञ्जीरनाद इव निर्मलभक्तिदेव्या
जेजीयते भगवतश्शुभनामघोषः ॥

(११)

उन्मीलनं शमदमादिमहागुणाना-
मुन्मूलनं विविधसंसृतिसंकटानाम् ।
उच्चाटनं सकलपातकराक्षसाना-
मुच्चारणं विजयते मुरवैरिनाम्नाम् ॥

(१२)

उत्तारकं भवपयोनिधिपातुकाना-
मुत्थापनं प्रणिधिलीनमुनीश्वराणाम् ।
उज्जीवनं प्रियवियोजितवल्लवीनां
संकीर्तनं जयति पावनकृष्णनाम्नाम् ॥

(१३)

दम्भोलिर्दुरिताचलेन्द्रशिखरे, मायामरौ शाद्वलो
भानुर्मोहमहान्धकारनिकरे, कामामये भेषजम् ।
सेतुर्मृत्युपयोनिधौ, हिमकरो जीवौषधीमण्डले
पीयूषं सुजनानने च तदिदं राराष्टि नामाक्षरम् ॥

(१४)

दुष्टानां दुरितापहं विषयिणां भोगस्पृहामार्जनम्
भीतानां भयभञ्जनं व्यसनिनां चेतःप्रमोदावहम् ।
मूढानां सदसद्विवेकमतिदं बद्धात्मनां मोचनम्
मुक्तानामनुरागभक्तिजनकं चोत्कृष्यते कीर्तनम् ॥

(१५)

दुर्दैवानि निवारयन्कृतमहापापानि सञ्चूर्णयन्
कामादीनपसारयन् मतिगतिं कात्स्न्र्येन संशोधयन् ।
वैराग्यं च विवेचनं च जनयन् भक्तिं परां पोषयन्
विज्ञानं ज्वलयन् भवं विशिखयन् जेजेति नामध्वनिः ॥

(१६)

कामादेर्मलसञ्चयस्य दहनं चित्तस्य संशोधकम्
दुर्दैवस्य निरासकं भवमहारोगस्य सिद्धौषधम् ।
वैराग्यस्य विवर्धकं शमसुखोल्लासस्य सन्दायकं
भक्तेः पुष्टिकरं जयत्यघरिपोः श्रीनामसङ्कीर्तनम् ॥

(१७)

नादब्रह्मविपञ्चिकानुरणनं धर्मद्रुमासेचनम्
कर्मग्रन्थिविदारणं बहुविधक्लेशौघनिर्वापणम् ।
आत्मज्ञानविकासनं निरुपमश्रेयः पदारोहणम्
भक्त्यानन्दसुधादुघं विजयते नामानुगानं हरे ॥

(१८)

शान्तेरक्षयपात्रमल्पतपसां जीवात्मनां दुर्लभम्
मुक्तेस्स्वादुतरं सनन्दनमुखैस्सिद्धेश्वरैस्सेवितम् ।
आर्तानामवलम्बनं भगवतः कारुण्यविस्फूर्जनम्
भक्तानां परदैवतं विजयते श्रीनाममन्त्राक्षरम् ॥

(१९)

अत्युच्चैरपुनर्भवामृतमहापाथोधिमुद्वेलयन्
गौरीशद्रुहिणादिमुक्ततिलकान् हर्षेण संनर्तयन् ।
संसाराख्यनितान्तघोरनरकं वेगेन वैकुण्ठयन्
नद्यान्नन्दसुतस्य नामपटलीगानस्य पुण्यध्वनिः ॥

(२०)

ब्रह्मोद्यं कतिचिन्मखं कतिपये योगासनं केचन
ब्रह्मध्यानमथापरे शमदमावन्ये तपश्चेतरे ।
सेवन्तां भवमुक्तये निजनिजाभीष्टेन नानाध्वना
किन्त्वेते वयमत्युदारभगवन्नामैकमाराध्नुमः ॥

--: ० :--

राधाविलासः

(प्रथमोल्लासः)

एकाकिनी काचन सुन्दराङ्गी
कृष्णाम्बुपूर्णां कलशं वहन्ती ।
सोपानपङ्क्तिं द्रुतमुत्तरन्ती
सन्ध्यागमेऽगादपरेव सन्ध्या ॥१॥

प्रस्विन्नवक्त्रां मृदुलो नभस्वान्
संवीजयंस्तां तरुणीं सिषेवे ।
सन्तप्तगात्रां शिशिरैः करैस्ताम्
संवाहयन् पर्यचरद्विधुश्च ॥२॥

सायन्तने मन्दमरुत्प्रचारे
चन्द्रोदये कैरविणीविकासे ।
सद्यः समश्रूयत वेणुनादः
कश्चिद्दृषद्द्रावणशक्तियुक्तः ॥३॥

वेणुस्वनाकर्णनमत्तचित्त-
राधाकरप्रच्युतहेमकुम्भः ।
सोपानपाल्यां तपनात्मजाया
ढुं ढुं ढुघोषेण लुठत्यधोऽधः ॥४॥

ततस्समन्तादवलोकयन्ती
ददर्श कञ्चित्सुषमाविलासम् ।
कलायनीलं कमलाभिरामम्
विलोचयन्तं विपिनं समस्तम् ॥५॥

वृक्षाश्च नीला विहगाश्च नीला
भूमिश्च नीला गगनं च नीलम् ।
नीलप्रभायामखिलं वनं त-
दाशीर्षमामग्नमिवावभातम् ॥६॥

ज्योत्स्नेव, कर्पूरतरङ्गिणीव,
माध्वीधुनीवामृतनिर्झरीव ।
सा कान्तिधाराखिललोभनीया
नीलोत्पलाक्ष्या नयनं सिषेच ॥७॥

क्षोणीतलस्थं मलमस्पृशन्तीम्
साक्षाच्चिदाकाशतलात्पतन्तीम् ।
तां कान्तिगङ्गालहरीं वगाह्य
हृष्यत्तनुः क्लिन्नमतिश्च साभूत् ॥८॥

शान्तैर्मयूखैस्तुलसीसुगन्धै-
र्वंशीनिनादैः कलितां प्रभां ताम् ।
विस्फारिताभ्यामनिमेषदृग्भ्याम्
तन्वी पिबन्ती प्रतिमेव तस्थौ ॥९॥

कियच्चिरं तद्रमणीयरूपम्
तथा चकासेति न सा विदेद ।
तिरोहितं तत् सहसाभिवीक्ष्य
शनैस्समाधेर्विरराम तन्वी ॥१०॥

प्रबुद्ध्य सम्यक् प्रकृतिं गता सा
समन्ततः केवलमन्धकारम् ।
उदीक्ष्य नष्टाखिलभागधेया
दिवश्च्युता देववधूरिवाभूत् ॥११॥

किं दृष्टमद्य क्व तिरोहितं तत्
किं वाथ कृत्यं क्व नु वाद्य गम्यम् ।
किञ्चिद्विनिश्चेतुमपारयन्ती
शोकं च मोहञ्च परं ययौ सा ॥१२॥

(द्वितीयोल्लासः)

मृदुशिशिरसमीरैः कुन्दमन्दारगन्धै-
र्धवलशशिमयमूखैः कोकिलोन्मत्तगीतैः ।
मदशिखिपरिनृत्तैर्हंसलीलाविलासै-
रतिशयरमणीयो यामुनोऽस्ति प्रदेशः ॥१३॥

सुरुचिरशिखिनृत्तान् मन्दवायुप्रचारान्
नवकुसुमितवृक्षान् कोकिलालापघुष्टान् ।
विधुकररमणीयान् यामुनान्कूलदेशा-
नभिसरति निशीथे कापि गोपालतन्वी ॥१४॥

वृन्दावननिकुञ्जेषु मा मा सञ्चर राधिके ।
तेषु सन्दृश्यते नक्तम् यद्भुजङ्गो भयङ्करः ॥१५॥

अथवा तत्र यानेन न हानिस्तव सोदरि ।
दष्टोऽनेन भुजङ्गेन मर्त्यो मृत्योर्विमुच्यते ॥१६॥

मार्गे मार्गे लोचनं चारयन्ती
कुञ्जे कुञ्जे कञ्चिदन्वेषयन्ती ।
स्थित्वा स्थित्वा क्वापि दीर्घं श्वसन्ती
मन्दं मन्दं याति काचित्कुमारी ॥१७॥

मन्दारगन्धो परिवाति वायु-
रुच्चैः पिकाः पञ्चममालपन्ति ।
प्राच्यां शरच्चन्द्र उदेति मन्दम्
राधे क्व सञ्चारयसे दृशौ त्वम् ॥१८॥

कोऽयं तमालाभ इति स्म पृष्टा
मित्रेण राधाऽवनमय्य शीर्षम् ।
तूष्णीमतिष्ठत् परमार्थतत्त्वम्
वक्तुं यथा वैदिकवागनीशा ॥१९॥

कृष्णानिकुञ्जं प्रति सञ्चरन्त्या
ज्योत्स्नां पटान्तेन निवारयन्त्याः ।
कृष्णानुरागाप्लुतमानसाया
वन्देऽङ्घ्रिरेणूनभिसारिकायाः ॥२०॥

मञ्जीरनादश्रुतिभीतिहेतो-
रत्यन्तमन्दं चरणारविन्दम् ।
विन्यस्य विन्यस्य वनं व्रजन्तीम्
कृष्णानुरक्तां प्रणमामि राधाम् ॥२१॥

शरच्चन्द्रिकाभिः स्फुरद्वालुकायाम्
मरुन्मन्दयानैश्चलन्मल्लिकायाम् ।
सरित्तीरभूमौ सरोजायताक्षम्
चिरं चिन्तयन्ती वराङ्गी न्यषीदत् ॥२२॥

वृक्षस्य कम्पे विहगस्य शब्दे
पुष्पस्य गन्धे व्रजराजसूनोः
आयानमाशङ्क्य मुहुर्मुहुस्सा
राधा समुत्तिष्ठति साध्वसेन ॥२३॥

खद्योतकीटस्स न बर्हचूडा
वातस्य घोषस्स न वेणुनादः ।
सान्द्रान्धकारस्स न कृष्णरूपम्
राधे त्वदूहस्सकलोऽप्यबद्धः ॥२४॥

अन्वेषयन्ती सुचिरं मुकुन्दम्
श्रान्ता सती कुञ्जगृहे निषिद्य ।
आसेवमाना यमुनासमीरं
राधा क्षणं कुड्मलितेक्षणासीत् ॥२५॥

निद्राभिभूत्या मुकुलीकृताक्ष्या-
स्तस्याः स्तनौ कन्दलितानशेषान् ॥
मुक्तामणीसुन्दरघर्मबिन्दून्
कृष्णानिलो गूढमपाहरत्सः ॥२६॥

आयाति कश्चित्तुलसीसुगन्ध
आकर्ण्यते कश्चन वेणुनादः ।
आविर्भवत्यद्भुतनीलिमैको
राधे किमद्यापि करोषि निद्राम् ॥२७॥

मन्दानिलः किं कलकोकिलः किम्
चन्द्रोदयः किं शदागमः किम् ।
रोमोत्सवः किं प्रणयाम्बुधिः किम्
प्रादुर्भवत्यद्भुतमूर्तिरेका ॥२८॥

स्नेहाभिवर्षीव नवाम्बुवाह-
स्सच्चित्सुगन्धीव वसन्तवातः ।
सायुज्यहासीव शरच्छशाङ्कः
प्रत्यक्षमागच्छति कोऽपि बालः ॥२९॥

किं मोहनिद्रा किमु योगनिद्रा
सा राधिकाया इति कोऽवयाति ।
अन्तःस्थितं प्रेष्ठमवेक्षमाणा
सा तं बहिःस्थं न ददर्श साध्वी ॥३०॥

यद्वा सुपक्वेन समाधियोगे-
नान्तर्ज्वलन्तं जगदेकनाथम् ।
पश्यन् ध्रुवस्तं न यथा बहिःस्थम्
तद्वत्पुरस्थं न ददर्श राधा ॥३१॥

मञ्जीरपादश्शिखिपिच्छशीर्षः
स्मेराननाब्जः कलवेणुहस्तः ।
राधाभिधाया व्रजकन्यकाया
नीलस्समाधिः कुशलं तनोतु ॥३२॥

(तृतीयोल्लासः)

राधां विविक्तस्थलवासलोलाम्
चिन्ताकुलां सन्ततमौनशीलाम् ।
शुष्यन्मुखाब्जामसकृद्रुदन्तीम्
दृष्ट्वा सखी भीतिमगान्नितान्तम् ॥३३॥

राधे न जानामि तवाधिमूलम्
ज्ञात्वैव तस्य प्रशमो विधेयः ।
सख्येति पृष्टा विजने कुमारी
प्राकाशयत् स्वं हृदयं कथञ्चित् ॥३४॥

अचुम्बितं वेदसरस्वतीभि-
र्निगुम्फकं दिव्यचमत्कृतीनाम् ।
निगूहितं मानसगह्वरे स्वम्
शुभाशयं साऽकथयत्कथञ्चित् ॥३५॥

चेतोऽनुरागक्षुभितं नियम्य
नेत्रे विलापारुणिते विमृज्य ।
ऊचे सखीं गद्गदविभ्रमेण
गूढाक्षरा पक्ष्मविलम्बिबाष्पा ॥३६॥

त्वत्तोऽस्ति हे सोदरि मे न किञ्चि-
द्गोप्यं तथाप्युत्कटमन्तराधिम् ।
अङ्गानि सर्वाणि शनैर्दहन्तम्
वाचा कथं ते प्रकटीकरिष्ये ॥३७॥

नितान्तहृद्यं हृदयह्रदे मे
चिराय गुप्तं सखि तद्रहस्यम् ।
मृतिं तथायुश्च ददन्मया ते
कथं प्रकाश्यं कथमप्रकाश्यम् ॥३८॥

एकान्ततो दुर्वचमप्यहं ते
शङ्कानिवृत्त्यै परितुष्टये च ।
सौहार्द्दबन्धेन यथाकथञ्चि-
त्त्वत्कर्णमूले गदितुं यतिष्ये ॥३९॥

आदातुमम्भः कलशं कदाचि-
त्कट्यां वहन्त्या यमुनां प्रयान्त्या ।
दृष्टो मया कश्चन सुन्दराङ्गो
मच्चित्त आकर्षति कोऽपि नान्यः ॥४०॥

उल्लासितं हासरुचा कृपाङ्गैः
कल्लोलितं फुल्लकलायनीलम् ।
मल्लाङ्ककोटिप्रतिमल्लशोभम्
बाल्याङ्कितं किञ्चिदपश्यमङ्गम् ॥४१॥

बर्हं शिरोजे तिलकं ललाटे
काञ्चीं नितम्बे मुरलीं कराब्जे ।
हासं मुखेन्दौ करुणां च नेत्रे
बिभ्रत्कुमारस्स दुनोति चेतः ॥४२॥

मां हन्ति तस्मिन् दिवसेऽर्कजान्ते
दिष्ट्यैव दृष्टस्य विलक्षणस्य ।
कैशोरकस्याक्षिरसायनस्य
रूपस्य हृद्यल्लिखितस्य शक्तिः ॥४३॥

सायाह्नकाले निबिडान्धकारे
कान्तारदेशे जनवासशून्ये ।
अश्वत्थमूले सहसैव दृष्टो
बालग्रहः कश्चन बाधते माम् ॥४४॥

सन्ध्याप्रभारञ्जितसर्वदेशे
वृन्दावने मांसदृशैव साक्षात् ।
आलक्षिता लोकविलक्षणा सा
लावण्यलक्ष्मीर्हृदयं भिनत्ति ॥४५॥

तस्मिन्प्रदोषे सकृदेव दृष्टाप्य-
द्यापि चित्ते स्फुटमुल्लसन्ती ।
निर्वाणदिव्यामृतवर्षिणी सा
नीलच्छविर्यच्छति मे विमूर्च्छाम् ॥४६॥

काचिन्नवोत्फुल्लकलायगुच्छ-
सच्छायनीलच्छविसम्पदृद्धिः ।
स्वच्छेऽर्कजारोधसि दृष्टपूर्वा
यच्छत्यविच्छिन्नसुखासुखे मे ॥४७॥

तस्यास्समस्तेन्द्रियरञ्जिकाया
नानाचमत्काररसप्रदाया ।
साक्षात्कृतेर्लोकविलक्षणायाः
को नाम वक्तुं प्रभवेत्प्रभावम् ॥४८॥

सौन्दर्यसङ्गीतसुगन्धशैत्य-
माधुर्यशान्तिद्युतिमार्दवानाम् ।
शृंङ्गारसारस्य कृपामहिम्नाम्
काष्ठापरा साऽनुभवैकवेद्या ॥४९॥

उत्पाटयन्तीव ममाक्षियुग्म-
मालोडयन्तीव ममेन्द्रियाणि ।
तस्य स्मितार्द्राः करुणाकटाक्षा
अन्तर्मनस्युल्लिखितास्स्फुरन्ति ॥५०॥

निष्यन्दिनी शान्तिसुधाकणाना-
मानन्दिनी प्राणहृदिन्द्रियाणाम् ।
उद्धर्षिणी सर्वतनूरुहाणाम्
कल्लोलिनी कान्तिचयस्य सा का ॥५१॥

सोऽनङ्गसाहस्रमनोहराङ्ग-
स्सोऽभङ्गशृङ्गाररसार्द्रनेत्रः ।
सोऽखण्डचण्डप्रतिमल्लवक्त्र-
स्सोऽत्यद्भुतालङ्करणशिशुः कः ॥५२॥

उन्मेषयन्तो मम जीववल्ली-
मुन्मीलयन्ती मम हृत्सरोजम् ।
उन्मूलयन्ती मम कर्मपाशम्
चिन्मूर्तिरेषा सखि का न जाने ॥५३॥

सुधाकरः किं मकरध्वजः किम्
सुधाघटः किं मदिरामदः किम् ।
कृपारसः किं सुषमाभरः किम्
कुमारकः कोऽयमवर्णनीयः ॥५४॥

आपार्य लोकद्वयदुर्लभं स्वम्
लावण्ययूषं मुरलीरवं च ।
सद्यः किशोरस्स तिरोहितोऽभूत्
पश्चात्तु कुत्रापि स नोपलब्धः ॥५५॥

दृष्ट्वा सकृत्तद्भुवनैकरम्यम्
सर्वेन्द्रियासेचनकं शुभाङ्गम् ।
अन्यत्र नेत्रे चरणौ मनो मे
गन्तुं कदाचित् सखि नोत्सहन्ते ॥५६॥

अन्धं बभूव त्रिजगत्समस्तम्
शून्यं प्रजातं हृदयं मदीयम् ।
तस्मिन्महातेजसि नेत्रचुम्बि-
न्यन्तर्हिते वैद्युतवत्क्षणेन ॥५७॥

अतृप्तनेत्रा सकृदीक्षणेन
पुनश्च तद्रूपसुधां पिपासुः ।
समस्तकाष्ठासु परिभ्रमन्ती
तमोविषं पीतवती दृशाहम् ॥५८॥

ज्योतिस्तदिन्दीवरलोभनीय-
माशासु सर्वासु गवेषयन्ती ।
आशाप्रभङ्गात्फलमन्यदेकं
नैवाध्यगच्छं हतमङ्गलाहम् ॥६९॥

तदैव वृक्णं हृदयं मदीयम्
उत्पाटितं नेत्रयुगं च यत्नैः ।
भूयोऽप्यहं प्रत्यवरोद्धुकामा
नाद्यापि सिद्धास्मि फलोदयेन ॥६०॥

चिरन्तनेनाध्वपरिश्रमेण
निरन्तरेणाश्रुनिपातनेन ।
क्रमप्रवृद्धेन हृदाधिना च
नितान्तताान्ता कृपणास्मि जाता ॥६१॥

अहन्यहन्याधिरुपैति वृद्धिम्
मुहुर्मुहुर्मुह्यति मेऽन्तरङ्गम् ।
क्षणे क्षणे शुष्यति मे शरीरम्
पदे पदे प्राणमरुत्प्रयाति ॥६२॥

तेजोविलासस्स मनोवगाढो
दन्तेन खादन्निव सप्त धातून् ।
ओजस्सहो वीर्यबलप्रभादि
सर्वं मदङ्गस्य शनैर्निहन्ति ॥६३॥

किं वा करोमि क्व नु वा व्रजामि
कं वा स्फुटं वच्मि कथं ब्रवीमि ।
आधिं ममान्तर्हृदये ज्वलन्तम्
वेत्तुं विदग्धः किमु मानुषोऽस्ति ॥६४॥

नीलां नवाम्भोदमनोभिरामाम्
लोलां तडित्पीतदुकूलवीताम् ।
बालामनिवार्च्यसुखस्वरूपाम्
छायां कदां तामवलोकयिष्ये ॥६५॥

नाहं समर्था सखि तत्र गन्तुम्
यत्रात्मतन्त्रो भगवान् स आस्ते ।
विश्लेषखिन्नां विवशां त्वमेव
मां कृष्णपार्श्वं कृपया नयस्व ॥६६॥

(चतुर्थोल्लासः)

कृष्णारोधसि सर्वतः कुसुमिते वेदालिभिर्मार्गिते
गूढे कुन्दलतागृहे स्थितवती सोत्कण्ठमेकाकिनी ।
दूरे न्यर्पितनेत्रकर्णयुगला काचित्सरोजेक्षणा
किञ्चिज्ज्योतिरुदीक्षितुं कलरवं श्रोतुं तपस्तप्यति ।६७।

राधा यामुनकानने व्रजशिशोस्सन्दर्शनोत्कण्ठया
दीर्घं निश्श्वसिति प्रजल्पति किमप्यश्रूणि निर्मुञ्चति ।
पृथ्व्यां जातु पतत्यथो विलुठति क्वाप्युत्तमाङ्गे करे-
णोच्चैस्ताडयति क्वचिच्च परमां मूर्च्छां समासीदति ।६८।

कालिन्दीसिकतामये शशिकरैर्द्धौते सितासुन्दरे
लग्ना काचन कन्यका जलधरश्यामं पिशङ्गाम्बरम् ।
कञ्चित्कोमलबालकं परमया प्रीत्या विचिन्त्याञ्जसा
योगारूढसुदुर्लभं मतिलयं निर्वाणमप्यन्वभूत् ॥६९॥

कारुण्यार्णवमार्द्रनेत्रमतसीवर्णं सुवर्णाम्बरम्
पूर्णं ब्रह्म गृहीतसुन्दरनराकारं भुजङ्गात्मना ।
ध्यायन्तीमधिरूढयोगपदवीं कृष्णानिकुञ्जे स्थिताम्
काञ्चिद्वासकसज्जिकां स्मरहराराध्यां नमस्कुर्महे ॥७१॥

कालाम्भोदचयस्य भृङ्गनिकरस्येन्दीवरस्यातसी-
पुष्पस्येन्द्रमणेः कलिन्दतनयातोयस्य वा दर्शने ।
यत्किञ्चित्प्रियरम्यवस्तु सहसा स्मृत्वा समाधिं गताम्
रागान्धां कृतजन्मकोटिसुकृतामाराधये राधिकाम् ॥७२॥

कालिन्दीजलपूर्णमल्पकलशं कट्यां वहन्ती शनै-
र्गच्छन्ती पथि तत्र तत्र नयनं सञ्चारयन्ती मुहुः ।
कर्णं सन्दधती कदाचिदसकृद्दीर्घं श्वसन्ती पुन-
र्जिघ्रन्ती भगवद्गवेषणपरा राधा पुनीतां जगत् ॥७३॥

मन्दं मन्दमुदारवेणुनिनदैर्मञ्जीरमञ्जुस्वनै-
रागच्छन्तमनङ्गकोटिकमनीयाङ्गं यशोदाङ्गजम् ।
नक्तं चन्द्रकराञ्चिते रविसुताकुञ्जे निलीय स्थिता
पश्यन्ती सरसं महासुकृतिनी राधा पुनीतां जगत् ॥७४॥

चेतोवृन्दावनान्तर्निरतिशयविरागालवालस्य मध्ये
स्वच्छन्दं वर्धमानां नखविधुशिशिरज्योत्स्नया दीप्यमानाम्
लीलावातेन लोलां मुरहरहरणस्नेहवल्लीं निषेक्तुम्
मन्दं यात्यश्रुकुम्भैस्सह सुकृतवती मामकी जीवगोपी ।७५।

(पञ्चमोल्लासः)

राकाशशाङ्कातपराजितासु
शान्तासु बह्वीषु विभावरीषु ।
दामोदरस्यागमनं प्रतीक्ष्य
कृष्णानिकुञ्जे निषसाद राधा ॥७६॥

प्रशान्तस्वनायां रजन्यां विवस्व-
त्तनूजातटस्थे विविक्ते निकुञ्जे ।
शिलाद्रावणं दिव्यवंशीनिनादम्
वरीवर्ति शुश्रूषुरेका कुमारी ॥७७॥

नक्तं मुकुन्दागमनं प्रतीक्ष्य
आकर्ण्य रम्यं मुरलीनिनादम् ।
कृष्णानिकुञ्जे सुचिरं निषण्णा
राधा समाधेस्सहसोदतिष्ठत् ॥७८॥

प्रशान्ते निशीथे विदूरप्रदेशात्
स्फुटं श्रूयमाणं हरेर्वेणुगानम् ।
कालिन्दात्मजाकूलकुञ्जे निषण्णा
समास्वादयन्ती व्रजस्त्री पुनातु ॥७९॥

आलोक्य कृष्णं सहसा समीपे
विस्फारिताक्षी पुलकीकृताङ्गी ।
विस्मृत्य निश्शेषवियोगदुःखम्
राधा परानन्दरसे न्यमङ्क्षीत् ॥८०॥

सर्वादियोगीन्द्रसमाधिभाग्यं
निर्वाणलक्ष्मीनटनैकरागम् ।
सा कृष्णरूपं चिरमीक्षणाभ्यां
पीत्वापि पीत्वापि न तृप्तिमाप ॥८१॥

आलोलदोर्भ्यां प्रणयेन गाढ-
मालिङ्ग्य राधा पशुपात्मजाङ्गम् ।
आतङ्कमूर्च्छाभिभवाद्विमुक्ता-
प्यानन्दमूर्च्छां पुनरप्यगच्छत् ॥८२॥

गोपालकृष्णस्य वियोगकाले
या जग्मुषी शोकजवेन मूर्च्छाम्
सा तस्य सन्दर्शनसन्मुहूर्ते
त्वानन्दवेगेन समाधिमेति ॥८३॥

सर्वेन्द्रियप्रोन्मथनप्रगल्भा
साक्षात्कृतिर्मन्मथमन्मथस्य ।
विश्वोत्तरा मानसमायताक्ष्या-
स्सद्यस्समाधिप्लुतमाततान ॥८४॥

सलीलं मुकुन्देन संस्पृश्यमाने
जगन्मङ्गले चारुराधाशरीरे ।
उदञ्चत्परानन्दरोमाञ्चपुञ्जो
महापातकं मे समस्तं क्षिणोतु ॥८५॥

पश्चाच्छनैरेत्य जनार्दनेन
केशे सलीलं कुसुमेऽर्प्यमाणे ।
दोलासमान्दोलनमाचरन्त्या
मुक्तः कटाक्षोऽवतु राधिकायाः ॥८६॥

राधा जयत्यब्जभवादिवन्द्या
रासोत्सवे कल्पितमत्तनृत्ता ।
प्रेमासवास्वादनतृप्तचित्ता
रोमोत्सवालङ्कृतपुण्यगात्रा ॥८७॥

वेणुस्वनाकर्णनहृष्टकर्णा
स्मेराननालोकनफुल्लनेत्रा ।
बिम्बाधरास्वादनमत्तचित्ता
गोपालबालस्य पुनातु राधा ॥८८॥

सायन्तने पशुकुलैस्सखिभिश्च साकम्
वेणुं कलं क्वणयता शनकैर्वनान्तात् ।
आगच्छता भगवता पथि सानुरागै-
रालोकनैर्नमसितां प्रणमामि राधाम् ॥८९॥

(षष्ठोल्लासः)

वृन्दावनोर्वी स्वत एव रम्या
कृष्णाङ्घ्रिविन्यासविलासरूपैः ।
दिव्यावतंसैस्समलङ्कृताङ्गी
सम्पद्यतेऽद्य द्विगुणीकृताभा ॥९०॥

साटोपनृत्तैश्शिखिमण्डलाना-
मत्युच्चगीतैः पिकसञ्चयानाम् ।
स्वच्छन्दचारैर्हरिणव्रजानाम्
रराष्टि वृन्दावनपुण्यभूमिः ॥९१॥

क्वापि श्रुतिर्मत्तमधुव्रताना-
मेकत्र गीतं कलकोकिलानाम् ।
अन्यत्र तालो गिरिनिर्झराणाम्
राराष्ट्यहो यामुनरम्यदेशः ॥६२॥

मञ्जुप्रणादैर्गिरिनिर्झराणाम्
मन्दप्रयाणैर्मलयानिलानाम्
लीलाविलासैर्वनवल्लरीणाम्
वृन्दावनं रञ्जयतीन्द्रियाणि ॥६३॥

पुष्पन्धयानां शुककोकिलानाम्
चक्राङ्गपारावतसारसानाम् ।
नानाप्रकारैर्मधुरैर्विरावै-
र्नौतीव वृन्दावनभूमिरीशम् ॥६४॥

पुण्यैस्सुगन्धैस्सुममञ्जरीणाम्
रम्यैर्निनादैः कुसुमन्धयानाम् ।
मुग्धैः प्रनृत्यैर्मदबर्हणानाम्
वृन्दाटवी सत्कुरुते मुकुन्दम् ॥६५॥

कृष्णस्तु कुत्रापि चिराय यातो
वृन्दावनोर्व्याः स्वपदप्रियायाः ।
स्नेहप्रयुक्तं स्तवनार्चनादि-
सत्कारसंरम्भमिमं न वेत्ति ॥६६॥

नृत्यन्ति मत्ता इह नीलकण्ठा
गायन्ति हृष्टाः कलकण्ठसङ्घाः ।
पूर्वाद्रिमारोहति पार्वणेन्दु-
रद्यापि नागच्छति कृष्णचन्द्रः ॥६७॥

कृष्णस्य योगीन्द्रमनोऽभिरामान्
लीलाविलासाननुसन्दधाना ।
अश्रूणि दृग्भ्यां परिमुञ्चमाना
जागर्ति राधा यमुनानिकुञ्जे ॥९८॥

एकाकिनी यामुनकूलकुञ्जे
गोपालसूनुं प्रतिपालयन्ती ।
जोत्स्नानिमग्नास्सकलाभिरामा
नानात्रियामा नयति स्म राधा ॥९९॥

भैष्मीस्वयंवरदिने तपनात्मजायाः
कूलस्थनिर्जनलतानिलये निषण्णा ।
नक्तङ्गिरामविषयं किमपि स्मरन्ती
बाष्पाण्यवर्तयत काचन सुन्दराङ्गी ॥१००॥

तत्याज रामो विपिनेषु सीताम्
योऽन्यां पुनर्नोदवहत्तथापि ।
तत्याज कृष्णश्च वनेषु राधाम्
भैष्मीं तु भूयः परिणीतवान् यः ॥१०१॥

सीतां समाश्वासयितुं समर्थो
वाल्मीकिरासीत्पितृनिर्विशेषः ।
राधां पुनस्सान्त्वयितुं विदग्ध-
स्तत्तादृशः स्निग्धगुरुः किमस्ति ॥१०२॥

हे राधिके, किं स्मरसि त्रियामाः
कुन्देन्दुमन्दानिलशोभितास्ताः ।
यास्वम्बुजाक्षेण गृहीतकण्ठा
हर्षाब्धिवीचीव ननर्तिथ त्वम् ॥१०३॥

विभावरी कृष्णसमुज्झितेयम्
न शोभते चन्द्रकराञ्चितापि ।
अतीतरात्रीरनुसन्दधाना
कथं न्विमां पश्यसि राधिके त्वम् ॥१०४॥

कल्पायते यद्विरहक्षणार्धो
मोक्षायते यद्वदनावलोकः ।
यस्यास्सतां त्वां सहसा विसृज्य
त्वत्प्राणनाथः क्व जगाम राधे ॥१०५॥

केशं पयोदे भ्रुकुटीं लतायां
नेत्रं सरोजे वदनं शशाङ्के ।
कायं कलाये नटनं तरङ्गे
निक्षिप्य राधे क्व गतः प्रियस्ते ? ॥१०६॥

वल्यां विलासं तपने दुकूलम्
बिम्बेऽधरोष्ठं मुकुरे कपोलम् ।
भृङ्गे कटाक्षं कुसुमे स्मितञ्च
विन्यस्य राधे, क्व ययौ पतिस्ते ॥१०७॥

पीताम्बरं स्निग्धशतह्लदायाम्
वन्यस्रजं मुग्धमहेन्द्रचापे ।
नित्यप्रबोधं त्वयि चार्पयित्वा
प्रव्रज्य राधे त्वदिनः क्वः यातः ॥१०८॥

आकर्ण्यते वेणुरवः पिकौघे
निर्वर्ण्यते नीलरुचिस्तमाले ।
आस्वाद्यते स्पर्शसुखं समीरे
कृष्णस्तथाप्यन्तरितोऽवभाति ॥१०९॥

संयोगकाले क्वचिदेव पूर्वम्
व्यालोकयो या भगवत्स्वरूपम् ।
विश्लेषकाले पुनरद्य सा त्वम्
सर्वत्र तत्पश्यसि किं न राधे ॥११०॥

गोवर्धनाग्रे यमुनातटान्ते
वृन्दावने स्वात्मनि चाखिलत्र ।
अन्तर्बहिः स्थावरजङ्गमेषु
कृष्णात्परं पश्यसि नैव किञ्चित् ॥१११॥

तं प्राणनाथं विरहक्षणेऽद्य
सर्वत्र पश्यन्त्यपि मन्यसे त्वम् ।
हस्तच्युतं दूरगतं गुहाया-
मन्तर्हितं दुर्लभमेव राधे ॥११२॥

(सप्तमोल्लासः)

स्वर्गापवर्गादिसुखानि यस्य
सङ्गाभिलाषात्तृणवज्जहौ या ।
तेनाम्बुजाक्षेण चिराद्वियुक्ता
वृन्दावने शोचति राधिका सा ॥११३॥

समीरणः कीचकरन्ध्रमार्गा-
द्विनिर्गतो वेणुनिनादशङ्काम् ।
मुहुः प्रयच्छन् सुकुमारगात्र्या
वियोगवह्निं ज्वलयंश्च वाति ॥११४॥

शैलो गुहा शैवलिनी निकुञ्ज-
स्सन्ध्या शशाङ्कः पुलिनं कदम्बः ।
एकैकमप्यम्बुरुहायताक्षम्
संस्मारयद्यच्छति शोकमूर्च्छाम् ॥११५॥

विश्लेषदुःखात्करुणं रुदन्तीम्
तामन्वरोदीत्स्थिरजङ्गमौघः ।
ग्लौर्हैमवर्षैर्हरिणोऽश्रुवर्षै-
र्द्रुः पर्णवर्षैर्जलदोऽम्बुवर्षैः ॥११६॥

श्रीराधिकाया विरहातुराया
निःश्वासवातेन दृशोष्मलेन ।
वृन्दाटवीरूढलता तरूणाम्
सर्वाणि शुष्काण्यभवन् दलानि ॥११७॥

विश्लेषदुःखानलतप्तदेहा
सा यत्र यत्रोपविवेश राधा ।
तत्तत्स्थलं प्लोषमवाप्य सद्यो
होमाग्निकुण्डोदरतुल्यमासीत् ॥११८॥

तांस्तानपाङ्गप्रसरान् स्मितार्द्रा-
स्तांस्तान्परिष्वङ्गरसान् समृद्धान् ।
पूर्वानुभूतान् मधूसूदनस्य
स्मृत्वा मुहुर्मोहमवाप राधा ॥११९॥

मन्दानिलान्दोलितवल्लरीके
चन्द्रातपार्द्रीकृतसैकतौघे ।
सुस्पर्शपुष्पास्तृतमञ्जुतल्पे
कुञ्जे सखी शाययति स्म राधाम् ॥१२०॥

प्रेम्णा सखीभिर्मृदुतालवृन्तै-
स्संवीजिताप्यम्बुभिरुक्षितापि ।
संवाहिताप्यङ्गुलिभिर्न लेभे
राधा प्रशान्तिं विरहातितप्ता ॥१२१॥

हिमांशुरश्मिं मृदुगन्धवाहम्
हिमाम्बुमिश्राङ्गविलेपनञ्च ।
शराद्विषात्पावकतोऽप्यसह्य-
ममंस्त राधा प्रियविप्रयुक्ता ॥१२२॥

हालाहलाभादमृतांशुबिम्बा-
दस्त्रौघकल्पान्नवपुष्पतल्पात् ।
अङ्गारवर्षान्मलयानिलाच्च
मामालि पाहीति जगाद राधा ॥१२३॥

विश्लेषदुःखानलदह्यमाना
निःश्वासचण्डानिलधूयमाना ।
प्रेमाश्रुपीयूषनिलीयमाना
राधा शनैः क्वापि तिरोबभूव ॥१२४॥

रागान्धचित्तां प्रियविप्रयोगात्
प्रज्ञाविहीनां मृतकोपमानाम् ।
राधां मनोज्ञैर्हरिनामगानै-
स्सञ्जीवयन्तो विहरन्ति कीराः ॥१२५॥

उत्कण्ठिताभिस्सुचिरं सखीभि-
श्शुश्रूषितापि प्रतिबोधलेशम् ।
नाविन्ददत्युत्कटकृष्णचन्द्र-
विश्लेषदुःखेन विमूर्च्छिता सा ॥१२६॥

संवीजनप्रोक्षणपुष्पवर्ष-
संवाहनाद्या विविधा विदग्धाः ।
शीतोपचारा विहितास्सखीभि-
स्तां मूर्च्छितां बोधयितुं न शेकुः ॥१२७॥

कर्णे स्वरालापनमन्त्रणाद्यैः
प्रत्यङ्गमालेपनमर्दनाद्यैः ।
चित्रैरुपायैश्चतुरं प्रयुक्तै
राधा सखीभिः प्रकृतिं न भेजे ॥१२८॥

स्निग्धे विदग्धे विरहाग्निदग्धे
मुग्धे मनोज्ञे भगिनीति सख्या ।
संबोधनैश्चन्द्रमुखी विचित्रै-
राहूयमानापि जहौ न मोहम् ॥१२९॥

अन्ते सखी भेषजसार्वभौमम्
कृष्णेति वर्णद्वयमेव तस्याः ।
उच्चैश्चिरं कर्णपुटे जजाप
राधा तदोन्मीलयति स्म नेत्रे ॥१३०॥

क्व प्राणनाथः क्व शशाङ्कवक्त्रः
क्व श्यामलाङ्गः क्व कुशेशयाक्षः ।
सोत्कण्ठमित्थं बहुधानुपृच्छ-
न्त्युन्निद्रितासीत्सहसा मृगाक्षी ॥१३१॥

सा लब्धसंज्ञा शनकैस्समन्तात्
सञ्चारयन्ती नयनारविन्दे ।
भूयोऽपि कृष्णं निकटेऽनवेक्ष्य
कृत्वाऽऽर्तनादं समियाय मूर्च्छाम् ॥१३२॥

(अष्टमोल्लासः)

निःश्रेयसात्कोटिगुणातिरिक्त-
मानन्दमास्वादयितुं स्पृहा ते ।
जागर्ति चेत्तर्हि जवेन याहि
वृन्दावनं प्रेमकलानिकेतम् ॥१३३॥

यत्रास्ति कृष्णप्रणिधानकान्त्या
जाज्वल्यमाना सुतरामधृष्या ।
दुर्गाभिवन्द्या भुवनं पुनाना
राधा महाभावमरन्दमत्ता ॥१३४॥

वैकुण्ठरागामृतदिव्ययूष-
माकण्ठमापीय नितान्तमत्ता ।
स्पर्शेन गीतेन निरीक्षणेन
सर्वान् पुनाना वसतीह राधा ॥१३५॥

तस्यै गुणासक्तदुरासदायै
पादाब्जबद्धार्धनिमीलिताक्षः ।
कुर्वन्जलिं दूरत एव तिष्ठन्
हे जीव ते सेत्स्यति येन भक्तिः ॥१३६॥

कश्शक्नुयाद्दिव्यमिदं शरीरम्
स्प्रष्टुं महाभावतडित्परीतम् ।
बाहुं प्रसार्यापि यदङ्घ्रिरेणु-
मादातुमीशोऽपि जगाम मूर्च्छाम् ॥१३७॥

भक्तिप्रभामण्डलवेष्टिताया
मातुं क ईष्टे महिमानमस्याः ।
यस्या सकृद्दूरविलोकनेन
ध्वस्ता सहस्राक्षदृशस्समस्ताः ॥१३८॥

तस्याः पदाम्भोजरजःकणानाम्
ध्यानं खला दर्शनमङ्गजार्ताः ।
पार्श्वं विरक्ता अभिमर्शमाप्ता
अत्यूर्जितं न प्रभवन्ति सोढुम् ॥१३९॥

सिद्धिश्च मुक्तिश्च विशङ्कमाने
स्थित्वातिदूरे प्रणयासवान्धाम् ।
देदीप्यमानां परिपश्यतस्ता-
माश्चर्यभावस्तिमितेक्षणाभ्याम् ॥१४०॥

राधां महाभावमदान्धचित्ताम्
मा मा स्पृश क्वाप्ययि मोक्षलक्ष्मि ।
तत्साहसं कर्म यदि प्रकुर्या-
स्तर्हि प्रभिद्येत तवोत्तमाङ्गम् ॥१४१॥

यदि स्पृशेद्योगिमतिं समाधि-
स्तदा ध्रुवं सा सपदि प्रणश्येत् ।
यदि स्पृशेत्त्वच्युतभक्तबुद्धिम्
तदा समाधिः स्वयमेव नश्येत् ॥१४२॥

स्पर्शेन साधारणजीववर्गम्
सन्दग्धुमीशोऽपि हिरण्यरेताः ।
चारित्रवीर्यां जनकस्य कन्याम्
स्पृष्ट्वाञ्जसा स्यात् स्वयमेव दग्धः ॥१४३॥

स्वमस्तकेष्वब्जभवादिधार्यम्
समस्ततीर्थास्पदमङ्घ्रिरेणुम् ।
विहाय लज्जामयि निर्विकल्प-
महासमाधे, भज राधिकायाः ॥१४४॥

प्रीत्यै मुरारेरिह लोकभोगम्
स्वर्लोकमोदं भवमोक्षसौख्यम् ।
तस्यापि संयोगरसं च हित्वा
कालं क्षिपन्त्याः प्रणयं ब्रुवे किम् ॥१४५॥

ज्ञात्वापि तं प्रेष्ठतमं स्वकान्त-
मन्याङ्गनालिङ्गनलोलचित्तम् ।
स्वान्तः प्रतिष्ठाप्य तमेव राधे
स्नेहाभिषेकैर्बत सत्करोषि ॥१४६॥

यस्याः पदाम्भोजपरागलिप्सु-
र्भर्गोऽपि वृन्दावनवीथिकासु ।
नक्तं रहश्चङ्क्रमते ब्रुवे किम्
तस्यास्तवाचिन्त्यमहानुभावम् ॥१४७॥

यस्याः पदस्पर्शनपूतपांसुम्
ब्रह्मादिमृग्यं शिरसि प्रधार्य ।
सद्यस्समाधिं तृणमप्युपैति
तस्याः प्रभावं तव किं ब्रवीमि ॥१४८॥

यस्या गलाद्गद्गदसंनिरुद्धा-
न्नित्यं गलन्त्यो मुरवैरिगाथाः ।
ब्रह्माण्डकोटीन् परिपावयन्ति
तस्याः कथं ते कथये महत्त्वम् ॥१४९॥

त्वल्लोचनान्निर्गलदश्रुतीर्थम्
संसेवितुं चेतसि बद्धकामः ।
केलीशुकीभूय करं त्वदीयम्
राधे समारोहति मुक्तलोकः ॥१५०॥

कृष्णोऽपि भृङ्गत्वविडम्बनेन
प्रच्छन्नवेषो नुतिभिः प्रतोष्य ।
यस्याः पदाब्जे कुरुते प्रणामम्
तस्याः कथं वच्मि तवानुभावम् ॥१५१॥

स्नेहः किलानिर्वचनीयरूपः
स्नेहावतारश्च विराजसि त्वम् ।
तस्माद्ध्रुवं भागवते शुकेन
हे राधिके काचिदितीरितासि ॥१५२॥

कृष्णोऽपयातः शिशवो निवृत्ता
लीलास्समाप्ता मुरली सुषुप्ता ।
कोलाहलः सर्वविधः प्रशान्तो
वृन्दावनं शून्यमिववावभाति ॥१५३॥

गोचारणं पर्वतसानुदेशे
वंशीरवः पिप्पलमूलभागे ।
रासोत्सवस्सूरसुतोपकण्ठे
सर्वेऽद्य जाताः स्मरणैकगम्याः ॥१५४॥

सर्वास्तदानीन्तनकृष्णलीला
नामावशेषा अभवंस्तथापि ।
अद्यैव गोविन्दपदानुरक्ते-
रत्युच्चकाष्ठा स्फुटमत्र भाति ॥१५५॥

आप्लाव्यते कृष्णवियोगसिक्तै-
र्निश्शेषवृन्दावनमश्रुवर्षैः ।
उज्जृम्भते सम्प्रति विप्रलम्भ-
शृङ्गारसंज्ञो रससार्वभौमः ॥१५६॥

वृन्दावनस्याच्युतवर्जितस्या-
प्यन्यादृशीं काञ्चिददृष्टपूर्वाम् ।
भक्ताभिरामां श्रियमातनोति
सान्निध्यमत्यद्भुतराधिकायाः ॥१५७॥

वृन्दावनोर्वी चरणार्पणेऽस्या-
स्तत्तादृशं कञ्चन रोमहर्षम् ।
अश्नाति यद्यादृशमच्युतस्य
पादाब्जयोर्विन्यसनेऽपि नाप ॥१५८॥

अन्तर्हितस्याप्यतिदूरगस्या-
प्याभीरनारीप्रियनन्दनस्य ।
प्रत्यक्षसान्निध्यमहाप्रकाशः
पूर्वाधिकोऽद्यैव समीक्ष्यतेऽत्र ॥१५९॥

वृन्दावनोर्वी स्वत एव पुण्या
लीलाशतैः पुण्यतरा मुरारेः ।
रागान्धराधाचरणारविन्द-
धूलीकणैः पुण्यतमा बभूव ॥१६०॥

राधामुखान्निर्गतभृङ्गगीता
कृष्णाननान्निःसृतपार्थगीताम् ।
हन्तातिशेते निगमान्तवाचाम्
व्यङ्ग्यार्थदा लाक्षणिकार्थदात्रीम् ॥१६१॥

भक्तस्य नेत्राद्गलदश्रुधारा
कृष्णस्य पादात्स्रवदम्बुकुल्याम् ।
आस्वादवत्वे परिपावनत्वे
मोक्षप्रदत्वे च सदातिशेते ॥१६२॥

निमीलिताभ्यां नयनाम्बुजाभ्यां
निरर्गलं निर्गलदश्रुधाराः ।
वियत्सरिद्भ्योऽप्यधिकं पवित्रा
मुकुन्दभक्तस्य पुनन्तु विश्वम् ॥१६३॥

कृष्णानुसन्धाननिमग्नबुद्धि-
र्नेत्राम्बुसंक्षालितगण्डभित्तिः ।
प्रेमामृतार्द्रीकृतसप्तधातु-
र्विश्वं समस्तं प्रपुनाति राधा ॥१६४॥

वेदान्तिनो भक्तिरसानभिज्ञा
राधास्थितिं दुःखमयीं वदन्ति ।
ब्रह्मादयो भागवतोत्तमास्तु
तां ब्रह्मसौख्यादधिकां भणन्ति ॥१६५॥

श्रीराधिकाया नयनाम्बुजाभ्यां
शश्वत् स्रवन्ती प्रणयाश्रुधारा ।
विश्लेषसन्तापसमुद्भवापि
शीता स्वयं शीतयति त्रिलोकीम् ॥१६६॥

स्थूलस्तदीयो विरहाश्रुबिन्दु-
र्दीर्घस्तदीयः श्वसितानिलश्च ।
एतद्द्वयं भक्तिसुधासमुद्रम्
पूर्णं च घूर्णं च चकार तूर्णम् ॥१६७॥

विज्ञानसूर्यस्य मयूखजालै-
रत्यूष्मलायामपवर्गभूमौ ।
दुष्प्राप एवैष नितान्तशीतः
प्रेमाश्रुगङ्गासलिलावगाहः ॥१६८॥

षाड्गुण्यपूर्णः स्वसुखैकतृप्तः
कैवल्यनाथः पुरुषोत्तमोऽपि ।
तीव्रेण राधाविरहाधिनैव
यातः कुरुक्षेत्रमिनोपरागे ॥१६९॥

मर्त्यस्सहस्रारमितिप्रसिद्ध-
मुत्तुङ्गमध्यासनमारुरुक्षुः ।
अस्तेयकारुण्यबृहद्व्रतेषु
सत्ये च सम्पादयतु प्रतिष्ठाम् ॥१७०॥

ख्यातं महाभावसमाख्यया य-
त्तद्दिव्यमुच्चैः पदमारुरुक्षुः ।
भोगेषु योगेष्वपुनर्भवेषु
सम्पादयेत्तीव्रतमां विरक्तिम् ॥१७१॥

एतन्महाभावपिपासयैव
कृष्णोऽपि राधाभिनयं वितन्वन् ।
श्रीकृष्णचैतन्यकलेवरञ्च
श्रीरामकृष्णाकृतिमप्यबिभ्रत् ॥१७१॥

भोगाभिवृद्धिर्नहि जन्मलाभो
ब्रह्मानुभूतिर्नहि जन्मलाभः ।
कृष्णोपलब्धिश्च न जन्मलाभ-
स्तद्भक्तिरेकैव तु जन्मलाभः ॥१७३॥

विश्वोत्तराद्ब्रह्मसुखाद्गरीयान्
पूर्णश्चमत्काररसस्स एव ।
यत्प्राणनाथं प्रतिपाल्य कृष्णम्
प्रेमाश्रु नित्यं परिमुञ्चतीति ॥१७४॥

सोऽयमेव विरलं पुरुभाग्यम्
सोऽयमेव परमः पुरुषार्थः ।
यो निरन्तरहरिस्मृतिहेतो-
स्सन्ततः प्रणयबाष्पविमोक्षः ॥१७५॥

अगणितसुखमेतत्पूर्णसौभाग्यमेतत्
परिणतशुभमेतज्जन्मसाफल्यमेतत् ।
यदिह भगवदङ्घ्रिप्रेमजन्येष्वभीक्ष्णम्
नयनसलिलतीर्थेष्वाशिरस्कावगाहः ॥१७६॥

औन्नत्यं किमुदारदेशिकपदे साष्टाङ्गपाता नति-
स्सम्पत्का जगदात्मने भगवते निश्शेषवित्तार्पणम् ।
मुक्तिः का मुरवैरिभक्तिनिगडैर्नित्यानुबद्धस्थिति-
स्सौख्यं किं हरिविप्रयोगकदनादत्युत्कटं रोदनम् ॥१७७॥

श्रीकृष्णविश्लेषतनूकृताङ्गीम्
शोकाश्रुनिष्यन्दिसरोरुहाक्षीम् ।
साक्षान्महाभावसुधाम्बुराशिम्
राधां भजे गोकुलभाग्यलक्ष्मीम् ॥१७८॥

राधां नमस्ये विरहाभिषिक्ताम्
शोकाश्रुतीर्थैस्सततभिषिक्ताम् ।
मुक्त्यन्तसौख्येषु भृशं विरक्ताम्
नन्दस्य पुत्रे परमानुरक्ताम् ॥१७९॥

यन्मानसं कृष्णपदैकतानम्
यच्चेष्टितं कृष्णसुखैकलक्ष्यम् ।
यज्जीवितं कृष्णकृपैकमूलम्
तां प्रेममूर्तिं प्रणमामि राधाम् ॥१८०॥

बाष्पावलीविमलमौक्तिकशोभिवत्साम्
रोमाञ्चमञ्जुलनिचोलनिवीतगात्राम् ।
कृष्णानुरागनवकुङ्कुमशोणगण्डाम्
राधां नमामि यमुनातटकुञ्जसंस्थाम् ॥१८१॥

नयनसलिलधारामौक्तिकोद्भासिवक्त्राम्
पृथुलपुलकपालीक्षौमसंवीतदेहाम् ।
हरिरतिमकरन्दास्वादनोद्यत्समाधि-
प्रलयजलधिमग्नां राधिकामर्चयामि ॥१८२॥

(नवमोल्लासः)

एकाकिनी नन्दकुमारकस्य
पुण्यापदानाननुसन्दधाना ।
नक्तं विविक्ते यमुनानिकुञ्जे
राधा वरीवर्त्यनुरागमुग्धा ॥१८३॥

आयास्यति प्रेष्ठतमः स्वपार्श्व-
मद्य इव इत्येव चिरात्कृताशा ।
ताम्बूलमाल्याङ्गविलेपनादि
सज्जीकरोत्यन्वहमुत्पलाक्षी ॥१८४॥

कलयति कमनीयं नन्दपत्नीकुमारं
रचयति शयनीयं पल्लवैः पुष्पजालैः ।
विलपति दयनीयं विप्रयोगाभिषङ्गात्
पततिच रमणीयं मूर्च्छिता हन्त कुञ्जे ॥१८५॥

एषा निशा प्राकृतचन्द्रयुक्ता-
प्यानन्दचन्द्रस्य वियोगहेतोः ।
नूनं व्यरंसीत्तिमिरावृतेति
सूर्योदये प्रत्यहमाह राधा ॥१८६॥

हे ज्यौत्स्नि, राकेन्दुमनोज्ञवक्त्रा
नक्षत्रमालाञ्चितविग्रहा त्वम् ।
आच्छादितात्युग्रनिजस्वरूपाम्
तां पूतनां स्मारयसीत्यभाणीत् ॥१८७॥

कस्यापि हेतोर्व्रजराजसूनु-
रद्यापि नागच्छदितस्तथापि ।
स श्वस्समायास्यति निश्चयेने-
त्यात्मानमाश्वासयति स्म नित्यम् ॥१८८॥

यद्वा स नायातु कदाप्यथापि-
तं संस्मरन्ती प्रणयाश्रुबिन्दून् ।
शश्वद्विमोक्तुं समवाप्तभाग्या
धन्याहमस्मीति जगाद राधा ॥१८९॥

विश्लेषदुःखेऽपि मुरान्तकस्य
निःश्रेयसात्स्वादुतरं प्रमोदम् ।
प्रेमप्रभावेण समश्नुवाना
राधा कृतार्था समगायदित्थम् ॥१९०॥

हे भृङ्ग हे कोकिल हे मयूर
हे कीर हे सारस हे मराल ।
आनन्दपीयूषदुघैर्मुरारे-
र्वृत्तैर्ममासिञ्चत कर्णनाडिम् ॥१९१॥

यूयं समायाथ मधोः पुरात्किम्
कच्चित्सुखं जीवति तत्र कृष्णः ।
मद्दुःखवार्ताकथनेन तस्य
कच्चित्कुरुध्वे न सुखान्तरायम् ॥१९२॥

मज्जीवनाड्या अमृतायमानाम्
तत्क्षेमवार्तामिह कीर्तयध्वम् ।
मत्प्राणबन्धो रसभञ्जकं तु
मा तत्र मद्वृत्तमुदीरयध्वम् ॥१९३॥

आलिङ्ग्य दोर्भ्यां मधुरापुरस्था-
श्शृङ्गारघूर्णा मधुराः पुरन्ध्रीः ।
आनन्दसिन्धौ पतितस्य तस्य
मत्स्मारणान्न व्यसनं विदध्वम् ॥१९४॥

आयातु वा गच्छतु वा यथेष्टम्
मां स्तौतु वा निन्दतु वार्यपुत्रः ।
सर्वास्ववस्थास्वपि राधिकेयम्
तुष्टास्मि सिद्धाखिलवाञ्छितास्मि ॥१९५॥

घ्रातं सकृत्तस्य मयाङ्घ्रिपद्मम्
श्लिष्टं सकृत्तस्य मनोहराङ्गम् ।
भुक्तं सकृत्तस्य कपोलयुग्मम्
शिष्टः किमन्योऽस्ति पुमर्थलाभः ॥१९६॥

आनन्दमूर्तेर्विरहादिदानीम्
कच्चिन्मया हृद्यनुभूयमानम् ।
दुःखं किमु स्यादथवा सुखं स्या-
न्नैतद्विनिश्चेतुमलन्तमास्मि ॥१९७॥

चित्ते मदीये स्मृतयस्तदीया
उन्निद्रतां प्राप्य समुज्जिहानाः ।
आनन्दरूपा विरहप्रदीप्ता
हर्षं शुचं मे युगपद्दिशन्ति ॥१९८॥

पूर्वानुभूतानि मया त्वदीया-
न्यालोकनाश्लेषणचुम्बनानि ।
हे कृष्ण, सम्प्रत्यतिदुर्लभानि
स्मृत्येकगम्यान्यपि हर्षयन्ति ॥१९९॥

हे कृष्ण लोकत्रयलोभनीयाः
कारुण्यदुग्धाम्बुधिवीचिरम्याः ।
वृन्दाटवीकेलिकलास्त्वदीया-
श्चित्ते मदीये स्वरसात्स्फुरन्तु ॥२००॥

भावस्थिराणामपुनर्भवेऽपि
नाशोज्झितानां हृदयङ्गमानाम् ।
त्वद्दिव्यवृन्दावनविभ्रमाणाम्
जागर्तु चित्ते मधुरस्मृतिर्मे ॥२०१॥

पूर्वं त्वया गोष्ठतले कृतानाम्
कल्याणकेलीरसनिर्भराणाम् ।
कल्लोलहल्लोहलमन्तराद्या-
प्यावर्त्यमानं सतृषं पिबामि ॥२०२॥

स्निह्यामि कृष्ण त्वयि सर्वथाहं
त्वं चेन्मयि स्निह्यसि वा न वापि ।
यस्तु प्रतिस्नेह फलानपेक्ष-
स्सः स्नेह एवानुपमः पुमर्थः ॥२०३॥

विसृज्य मां गच्छ विदूरदेशम्
परस्त्रियां स्निह्य यथाभिलाषम् ।
दुरन्तदुःखे क्षिप निर्भयं माम्
तथापि मे प्राणपतिस्त्वमेव ॥२०४॥

हे कृष्ण मां विस्मर निर्विशङ्कम्
सौख्यं यदि स्यात्तव येन पूर्णम् ।
नाहं भजिष्यामि शुचं कदाचित्
त्वत्तुष्टिरेकैव ममापि तुष्टिः ॥२०५॥

तज्जीवितं मे नरकप्रयाणा-
दानन्दपूर्णं भगवन् यदि स्यात् ।
अद्यैव हे माधव तत्र गन्तुं
यत्तास्मि सन्तोषसमन्विताहम् ॥२०६॥

नित्यं ममान्तःकरणारविन्दे
सम्यक् स्फुरन्तीं तव दिव्यमूर्तिम् ।
स्नेहाभिषेकेण समर्चयेय-
मित्येक एवास्ति ममाभिलाषः ॥२०७॥

त्वद्रूपमानन्ददुघं वरेण्यम्
लावण्यकन्दं विजितेन्द्रनीलम् ।
योगीन्द्ररम्यं प्रणयैकगम्यम्
मा जातु मेऽन्तःकरणात्तिरोभूत् ॥२०८॥

धिङ् मां ययोक्तं पुनरप्यबद्धम्
हे कृष्ण, नेदृश्यपि मेऽस्ति वाञ्छा ।
शश्वत्परानन्दसुधासमुद्रे
क्रीड त्वमित्येव ममार्थनास्ति ॥२०९॥

त्वत्पादपद्मार्पितजीविताह-
मभ्यर्थये सस्पृहमेतदेकम् ।
आनन्ददुग्धाम्बुधिवीचिजाले
स्वच्छन्दलीलामनिशं विधत्स्व ॥२१०॥

—: ० :—

राधाराधनम्

भूसंस्पर्शविवर्जितां सुविमलां ज्ञानाम्बरालम्बनाम्
सानन्दं कृतताण्डवां खलदृशोऽसंवीक्षितुं दुश्शकाम् ।
कृष्णाम्भोधरमात्रनिर्भरपरीरभ्यां स्वयं भास्वराम्
राधाख्यां स्मर नीलकण्ठविनुतामुद्दामविद्युल्लताम् ।।१।।

सर्वालङ्कृतिभूषितां गुणवतीं सञ्चारिभावात्मकैः
प्रेष्ठश्रेष्ठसखीजनैः परमया प्रीत्या मुहुस्सेविताम् ।
स्वादिष्ठां रसिकाग्रगण्यभगवच्चेतश्चमत्कारिणीम्
वन्दे मुक्तदुरासदां शुभमहाभावात्मिकां राधिकाम् ।।२।।

पातिव्रत्यमहासुगन्धरुचिरां सच्चिद्विलासोज्ज्वलाम्
व्यालम्बिप्रमदाश्रुपक्ष्मनयनां रोमोत्सवालङ्कृताम् ।
कृष्णाकुञ्जनिलीनगात्रलतिकां मुक्तिश्रिया मार्गिताम्
कृष्णाङ्घ्रिप्रणयामृतान्धहृदयामाराधये राधिकाम् ।।३।।

प्रेष्ठैकप्रणिधानमग्नधिषणामेकान्तकुञ्जस्थिताम्
सम्यग्विस्मृतदेहगेहभुवनां विष्वक्प्रभामण्डलाम् ।
मुक्त्यन्ताखिलनिःस्पृहां नवमहाभावामृतास्वादने-
नोन्मत्तां परमात्मपट्टमहिषीं राधां समाराधये ।।४।।

यस्या बाष्पकणे निपत्य विवशः कृष्णो बलादूह्यते
यस्या निश्वसितानलेन स मुहुर्दोधूयते तूलवत् ।
यस्याः प्रीतिलवार्जनं स मनुते स्वीयं पुमर्थं परम्
तां वन्देऽनवगाह्यवैभवयुतां लोकाम्बिकां राधिकाम् ।।५।।

-: ० :-

क्व ? क्व ?

भगवत्प्रणयातिमिते हृदये
प्रमदाश्रुकणैः कलुषे नयने ।
पुलकप्रचयैः खचिते वपुषि
क्व रुजादिभवः ? क्व कृतान्तभयम् ? ॥१॥

नवनीरदनीरमनोज्ञतनौ
विधुमण्डलसुन्दरमुग्धमुखे ।
व्रजराजसुते लसिते मनसि
क्व धनं ? क्व यशः ? क्व कुटुम्बसुखम् ? ॥२॥

शिखिपिच्छविभूषितकेशभरे
तिलकाङ्कितनिर्मलफालतले ।
मुरलीं मुरवैरिणि वादयति
क्व जपः ?क्व मखः ? क्व तपः? क्व शमः ? ॥३॥

कलनूपुरकिङ्किणिमञ्जुरवैः
करघोषकटाक्षसुहासरसैः ।
पुरतः परिनृत्यति नन्दशिशौ
क्व समाधिरुचिः ? क्व विमुक्तिरतिः ? ॥४॥

नयने विवृते पिहिते च सति
प्रतिबोधधनो बहिरन्तरपि ।
भगवांस्फुरति स्फुटमेव यदि
क्व रवेरुदयः ? क्व तदस्तमयः ? ॥५॥

नृत्यति

आम्नायान्तमहावने यदनिशं विद्वत्तमैर्मृग्यते
भ्रू मध्ये विजितेन्द्रियैर्यदृषिभिर्नित्यं निदिध्यास्यते
भक्तैश्च प्रतिमादिषु प्रतिदिनं प्रीत्या यदाराध्यते
घोषे नृत्यति नूपुरं विरणयन् पूर्णं परं ब्रह्म तत् ॥१॥

काराधाम्नि कृतोदयो व्रजतले सन्नीतकौमारको
द्वार्वत्यां गतयौवनो जरठतां प्राप्तः प्रभासेऽपि च ।
धर्मिष्ठान्परिपालयन् खलजनान्व्यापादयन् सर्वथा
भक्तौघाननुरञ्जयन् विजयते पूर्णावतारो हरिः ॥२॥

भायान्मे हृदि शंकरप्रभृतिभिर्विश्वेश्वरैरन्वहम्
ध्येयाङ्घ्रिः श्रुतिशीर्षवाक्यनिकरैरन्वेषितस्सर्वतः ।
मायातीतगुणानुभावजलधिर्वंशीशिखण्डाञ्चित-
च्छायानाथसुतातटीचरदखण्डानन्दसच्चिद्रसः ॥३॥

भयान्मे हृदि मीनकुण्डलमणिव्यालम्बिगण्डस्थलः
पिच्छालङ्कृतनीलकुन्तलभरः श्वेतोर्ध्वपुण्ड्रालिकः ।
वंशीचुम्बितशोणदन्तवसनो व्यालोलचिल्लीलतः
स्मेरालोकनशीतलोचनयुगः श्रृङ्गारनारायणः ॥४॥

बाल्योन्मीलितमूत्तिमार्द्रहसितोत्फुल्लारनाम्भोरुहां
कारुण्योन्मिषितेक्षणां कलतुलाकोटीविराजत्पदाम् ।
वंशीरन्ध्रनटत्कराङ्गुलिदलां बर्होल्लसत्कुन्तलाम्
सौन्दर्योपचयस्य कामपि परां काष्ठां निदिध्यास्महे ॥५॥

दुष्टानां गलकर्त्तनं विषयिणां कामादिनिर्मार्जनम्
शिष्टानां भवतारकं व्यसनिनां सन्तापनिर्मूलकम् ।
मुक्तानां सुखकारकं पदजुषामेकान्तभक्तिप्रदं
गोपीनां निजरूपदायकमनुध्यायामि नन्दात्मजम् ॥६॥

भृङ्गालीहृदयङ्गमाङ्गमतुलश्रीमत्प्रसन्नाननं
भृङ्गालङ्कृतपाणिपङ्कजमपाङ्गाकृष्टगोपाङ्गनम् ।
श्रृङ्गारोज्ज्वलपिङ्गलाम्बरमनङ्गाराधिनालिङ्गितं
श्रृङ्गाराब्धिजमिन्दुमर्कतनयारङ्गस्थमाराधये ॥७॥

मन्दस्पन्दिमनोज्ञचिल्लिलतिकासरञ्जितालोकनं
मञ्जुस्यन्दिमनोहरस्मितसुधामज्जन्मुखाम्भोरुहम् ।
सच्चिद्गन्धि सुनीलकान्तिलहरीपोप्लूयमानाङ्गकं
वन्दे नन्दगृहाङ्गणप्रणयिनं ब्रह्माण्डकोटीश्वरम् ॥८॥

यस्याकर्णनतो विरज्य विषये राज्यं नृपास्तत्यजु-
र्दूरे वीक्ष्य तपस्विनो यमभवन् निःश्रेयसे निस्पृहाः ।
स्पृष्ट्वा यस्य तनुं सकृत् विमुमुहुः सद्यो व्रजस्त्रीजनाः
वन्दे सर्वविलक्षणोत्तमचमत्कारार्णवं तं शिशुम् ॥९॥

ज्योत्स्नौघैरमृताभिषेचनविधिं मन्दानिलैर्वीजनं
नानापक्षिरवैस्तवानुडुगणैर्नीराजनं चान्वहम् ।
कृत्वेयं प्रकृतिस्समस्तजननी भक्त्या यमासेवते
पायान्नः स महाप्रभुः पुरुदयासिन्धुर्यशोदाशिशुः ॥१०॥

---: ० :---

सेवे

कारुण्यामृतनिर्भरैर्जलवतीं केलीरसैः स्पन्दिनीं
मन्दस्मेरमुखेन पङ्कजवतीं नृत्तेन कल्लोलिनीम् ।
वंशीमञ्जुरवेण मर्मरवतीं लोकत्रयीपावनीं
सेवे काञ्चन नन्दगोपभवनोदञ्चत्प्रभावाहिनीम् ।।१।।

वीतोपाधिकविश्ववत्सलतया लोलायितं नित्यदा
धेनूनां रसनावलेहविधिना क्षामायितं भूरिशः ।
गोपीनां प्रणयावलोककलया श्यामायितं सर्वतः
कञ्चिद्वेदगवेषितं मधुरिमोल्लासं व्रजस्थं भजे ।।२।।

विश्वाधारमकारणात् क्षितितले दृग्गोचरत्वं गतं
बालाकारमनङ्गकोटिसुषमाचौरं स्मितार्द्राधरम् ।
नन्दागारचरं स्मरान्तकमुखैरन्वेषितं कञ्चन
प्रेमोद्गारमखण्डमुक्तिसुखतो ज्यायांसमाराधये ।।३।।

पिच्छालङ्कृतकुन्तलं कुवलयश्यामाभिरामाकृतिं
मन्दस्मेरमुखाम्बुजं मुरलिकासंस्पृष्टबिम्बाधरम् ।
चञ्चत्सुन्दरचिल्लिकालतमनुक्रोशार्द्रनेत्राञ्चलं
कञ्चिद्भास्करनन्दिनीतटगतं श्रौतार्थमाराधये ।।४।।

यस्य श्रीचरणारविन्दयुगले ब्रह्मा द्विरेफायते
यस्य स्मेरमुखेन्दुबिम्बसविधे राधा चकोरायते ।
यस्य श्यामलगात्रमेघपटले लक्ष्मीश्च शम्पायते
पूर्णैश्वर्यपरानुरागसुषमासम्पद्गृहं तं भजे ।।५।।

लीलापाङ्गविलोकनैर्मृदुचलच्चिल्लीलताविभ्रमै-
रानन्दस्मितचन्द्रिकालहरिभिर्वंशीनिनादामृतैः ।
उत्सर्पतद्वनमालिकापरिमलैरङ्गप्रभाकन्दलै-
र्विश्वं मोहयते नमोऽस्तु महते कस्मैचन ज्योतिषे ॥६॥

बर्हौघं कबरे निबध्य मुरलीं विन्यस्य बिम्बाधरे
मञ्जीरं पदयोर्विधृत्य तिलकं फाले प्रकल्प्यान्वहम् ।
वृन्दारण्यतले समं सखिजनैस्संचारयन्तं पशून्
वन्दे मन्मथकोटिकोटिसुभगं नन्दाङ्गनानन्दनम् ॥७॥

गोपीनां प्रणयाश्रुसेकविधिना निष्पादितं वर्द्धितं
शश्वन्नूतनबालभावरुचिरं कृष्णातटीगोचरम् ।
युक्तानां नयनाञ्जनं मरकतश्यामाभिरामप्रभं
वन्दे कञ्चन शाद्वलं श्रुतिशिरोगोभिश्चिरान्वेषितम् ॥८॥

-: ० :-

न जाने

नवीनाम्भोदः किं विकसदतसीगुच्छ उत किं
द्विरेफश्रेणी किं मरकतमणीहार उत किम् ।
लसत्तापिच्छः किं रविदुहितृकल्लोल उत किं
न जाने का वेयं नयनसुखदा नीलसुषमा ॥१॥

अपि प्राणिव्रातैः कृतसुकृतमेकत्र मिलितं
किमु ब्रह्मानन्दः सतनुरवतीर्णः क्षितितले ।
उत प्रादुर्भूतः परमपुरुषार्थो नयनयो-
र्न जाने कोऽयं यः स्फुरति महिमा यामुनतटे ॥२॥

अपि स्याच्चण्डांशुर्हृदयतिमिरध्वंसनपटुः
किमु स्यात् पूर्णेन्दुः प्रणयरससिन्धोस्समुदितः ।
अथो स्यात्कन्दर्पः स्मरदहनचेतोविमथनो
न जाने को वायं तपनतनयासैकतचरः ॥३॥

समाधिः साकारः सकलजनभाग्यं धृतवपुः
परप्रेमा मूर्त्तः परमहरिधर्मोऽवयववान् ।
विमोक्षः प्रत्यक्षः किमियमिति शङ्कां जनयतो
न जाने याथार्थ्यं व्रजभुवि चरिष्णोरतिशिशोः ॥४॥

मुहुर्मन्दस्पन्दिभ्रुकुटिरुचिरापाङ्गविहृति-
र्मधुस्पन्दिस्मेरस्फुरदधरसंचुम्बिमुरलिः ।
त्रिभङ्ग्या यस्तिष्ठत्यरुणदुहितुः पुण्यपुलिने
न जाने सोऽयं को भवति कुत आयात इति च ॥५॥

किमु ज्योत्स्नायूषः किमु शिशिरकर्पूरसलिलम्
किमु क्षीरासेकः किमु सुविकसत्कुन्दकुसुमम् ।
किमु स्नेहोल्लासः किमु विमलमुक्तामणिगणो
न जाने केयं या स्फुरति सितकान्तिः शिशुमुखे ॥६॥

कलापोद्यत्केशः कुटिलतिलकोल्लासिनिटिलः
क्वणद्वंशीहस्तः सुललितनटच्चिल्लियुगलः ।
स्मितस्नातापाङ्गः पदकटककूजन्मृदुपदो
न जाने को वायं मृडमृगितशृङ्गाररसिकः ॥७॥

चलच्चिल्लीयुग्मं नलिनदलमुग्धायतदृशं
शशाङ्कस्मेरास्यं ललितमुरलीशोभितकटम् ।
क्वणन्मञ्जीराङ्घ्रिं मरकतमणिश्यामलतनुं
न जाने वेदान्तैर्विचितमिमत्यद्भुतशिशुम् ॥८॥

विलोलद्भ्रूभङ्गैरखिलभुवनानां रचयिता
शुभापाङ्गक्षेपैर्मनुजहृदयग्रन्थिदलनः ।
स्रवद्वंशीनादैरभवमुदि वैराग्यजनको
न जाने को वायं कुसुमशरकोटिप्रतिभटः ॥९॥

अपर्णाया भर्तुश्चिरतरसमाधेः परिणति-
र्व्रजस्त्रीणां गूढप्रणयमतिवृत्तेः प्रतिकृतिः ।
विधेश्चेतोधर्मप्रचुरकरनैपुण्यपरिधि-
र्न जाने को वायं निरुपमचमत्कारजलधिः ॥१०॥

जपैर्दानैर्होमैःप्रणिधिमखतीर्थाटनतपो-
व्रतस्वाध्यायाद्यैः प्रवचनगुरूपासनमुखैः ।
समस्तैः श्रेयोभिर्मनुजनिवहोऽयं मृगयते
न जाने सोऽयं को भवति सकलानां प्रियतमः ॥११॥

नृणां यस्य ध्याने विकसति जुगुप्सा भवसुखे
यदालोके दूराद्विरतिरभवे सिद्ध्यति दृढा ।
सकृद्यस्य स्पर्शे प्रमदरभसान् मूर्च्छति जनो
न जाने सोऽयं कः सकलहृदयाकर्षणचणः ॥१२॥

श्रुतः श्रद्धापूर्वं सपदि हृदि रूढो भवति यो
मुहुर्ध्यातो भोगे दृढतरविरागं विशति यः ।
सकृद्दृष्टः साक्षादरुचिमभवेऽप्यावहति यो
न जाने सोऽयं कः प्रणयरससिद्धैकविदितः ॥१३॥

विरक्तानां भुक्तावुपनमति निःश्रेयससुखं
निराकाङ्क्षो मुक्तावनुभवति भक्त्यात्मकरसम् ।
तया भक्त्या सिद्ध्येदमितमतिमाधुर्यधयनं
न जाने सोऽयं को भवति मतिवाण्योरविषयः ॥१४॥

स्वनीलाङ्गश्रीभिर्भवमरुमहीं शाद्वलयतः
स्वगीतैः क्ष्वेलाब्धिं सुमधुरसुधासागरयतः ।
स्वसत्कीर्त्या चेतस्तिमिरनिकरं चाञ्जनयतो
न जाने याथात्म्यं दृशि विलसतोऽप्यस्य महसः ॥१५॥

क्वचित्संख्योत्साहः क्वचिदगणितक्रोधरभसः
क्वचिन्मर्मालापः क्वचिदमलशृङ्गारविहृतिः ।
क्वचिच्छान्तो भावः क्वचिदमितकारुण्यलहरी
न जाने को वायं विविधरसचातुर्यरुचिरः ॥१६॥

सदा कुम्भीपाके पचनमपि याचेत मनुजो
यतः साक्षात्कारो यदि भवति यत्सुन्दरतनोः ।
किरन्नक्ष्णोस्तावन्निरतिशयहर्षामृतझरीं
न जाने सोऽयं को भुवि दिवि विकुण्ठे च विरलः ॥१७॥

क्वचित्प्रोच्चैर्हासः क्वचिदपि कृपालोकनकला
क्वचिद् वंशीगीतिः क्वचिदपि मदोन्मत्तनटनम् ।
क्वचित्केलीयुद्धं क्वचिदपि खलानां प्रमथनं
न जाने कृष्णः किं ललितसरलः किन्नु गहनः ॥१८॥

किमु श्रुत्यन्तोक्त्यां किमु मुनिवरस्वान्तकमले
किमु च्छायानाथे किमु महितवैकुण्ठभुवने ।
किमु क्षीराम्भोधौ किमु मधुपुरीसौधशिखरे
न जाने गोविन्दः क्व नु खलु निलीनोऽद्य वसति ॥१९॥

दवाग्नेर्वात्याया गरलसलिलाद् व्यालवदनात्
तडिद्भ्यो वृष्टिभ्यो दितिजदनुजेभ्यो व्रजजनान् ।
मुहू रक्षित्वान्ते त्यजति बत यस्तानशरणान्
न जाने सोऽयं किं मृदुलहृदयः किं कठिनधीः ॥२०॥

अनाहूतोऽप्याराज्जिगमिषति यः कैश्चन जनैः
समाहूतोऽप्यन्यैरतिगहनमौनं भजति यः ।
प्रहासं केषाञ्चिद् रुदितमितरेषां दिशति यो
न जाने सोऽयं किं विषमधिषणः किं सममतिः ॥२१॥

विरक्तः स्यात्तन्व्यां परमविषयी यस्य कथया
स्मरारिर्यस्याङ्घ्रिं स्मरति सततं चित्तकमले ।
समं गोपीभिर्यो नटति च महारासविहृतौ
न जाने सोऽयं किं निजसुखरतः किं विटवरः ॥२२॥

यतो भीत्या सिन्धुर्ग्रसति न भुवं वर्षति घनः
समुद्गच्छत्यर्कश्चलति पवनोऽग्निर्ज्वलति च ।
जरासन्धाद्भीतो द्रवति च पुराद्यो द्रुततरं
न जाने शूरो वा चकितहृदयो वा स भगवान् ॥२३॥

सुराणां मर्त्यानां मृगफणिखगानां विटपिनां
छिनत्ति स्वच्छन्दं सुदृढभवपाशं सपदि यः ।
स्वबन्धं तु छेत्तुं प्रभवति न यो मातृरचितं
न जाने सोऽयं किं परमपुरुषः किं नरशिशुः ।।२४।।

निदेशं गोपीनामनुसरति यो बद्धकुतुकं
स्वभक्तानां धात्रा शिरसि लिखितं मार्जयति यः ।
पशोः पृष्ठे श्रुत्या अपि तु पुरतश्च द्रवति यो
न जाने सोऽयं किं परजनवशः किं निजवशः ।।२५।।

प्रणष्टः प्रद्युम्नः प्रसभमनिरुद्धोऽप्यपहृतो
हताः कृष्णापुत्राः अरिभिरभिमन्युश्च मथितः ।
परित्राताः पार्थव्रजजनपरीक्षित्प्रभृतयो
न जाने कृष्णः किं स्वपिति किमु जागर्त्यविरतम् ।।२६।।

अरक्षद्यो मित्रप्रकरमभिमन्योस्तनुभुवं
स्वमातुः षट्पुत्रान् गुरुतनयमप्यन्तकमुखात् ।
स्वयं सन्मातुं तु प्रभवति न यो लुब्धकशरात्
न जाने सो ऽयं किं निखिलनिपुणः किं न्वकुशलः ।।२७।।

प्रजज्ञे कारायां पशुपभवने बाल्यमनयत्
कुशस्थल्यां निन्ये नवतरुणतां वार्द्धकमपि ।
प्रभासे चाप्यन्ते निधनमगमद्यश्शरहतो
न जाने सोऽयं किं प्रकृतिरचितः किं स्वरचितः ।।२८।।

त्यजन्यः क्षीराब्धिं पशुपसदने दुग्धमहरत्
विमुक्तः कारायाः व्रजमृगदृशो बन्धमवृणोत् ।
भृशं ब्रह्मण्यः सन् धरणिधरशापान्मृतिमगात्
न जाने सोऽयं किं कृपणधिषणः किं निपुणधीः ।।२९।।

क्वचिन्मत्स्यः कूर्मः क्वचिदपि वराहो नरहरिः
क्वचिद्देवो मर्त्यः क्वचिदपि यतीन्द्रो गृहपतिः ।
क्वचित्स्वात्मारामः क्वचिदपि जगत्सृष्टिनिरतो
न जाने सोऽयं किं गुणविरहितः किं गुणयुतः ॥३०॥

विधिर्विष्णुश्शम्भुर्निखिलनिगमाः सर्वमुनयः
समस्ताः दिक्पालाः सकलसरितोऽशेषपितरः ।
असंख्याता धर्मा रहसि निविशन्ते यदुदरे
न जाने सोऽयं कः खलु भवति को वा न भवति ॥३१॥

विधोः कान्त्या स्नानं द्विजकलरवैर्वेदविनुतिं
प्रकृत्या नैवेद्यं मलयमरुता चामरवरम् ।
उडुश्रेण्या दीपं स्वयमनुभवन् योऽभिरमते
न जाने सोऽयं किं त्रिभुवनततः किं करगतः ॥३२॥

किमुग्रः किं सौम्यः किमखिलसुशक्तः किमबलः
किमज्ञः किं विद्वान् किमतिविरलः किन्नु सुलभः ।
किमीक्ष्यः किं द्रष्टा किमसुखकरः किं सुखकरो
न जाने वेदोऽयं वदति भगवन्तं स क इति ॥३३॥

क्षितौ तोये वह्नौ मरुति गगने मर्त्यमृगपो
खगे देवे वृक्षे महति परमाणौ च सकले ।
विराजन्नप्यन्तर्बहिरनवलोक्यो वसति यो
न जाने भूतार्थः किमु किमु मृषार्थः स भगवान् ॥३४॥

:- ० :-

पादादिकेशान्तम्

यन्मूलस्य मनोज्ञशोणसुषमासन्ध्यां यदग्रस्य तु
श्यामाभा रजनीं यदीयनखरस्यांशुश्च चन्द्रातपम् ।
उत्पाद्यप्रणयान्धगोपसुदृशां यच्छन्ति दिव्योत्सवम्
तद्वेदान्तगवेषितं भगवतः पादद्वयं भावये ॥१॥

निर्वाणामृतनिर्झरीर्विकिरतो धर्मौषधीसञ्चयं
सम्यक् पोषयतः प्रबोधकिरणैरन्तस्तमः कृन्ततः ।
गोपीनामनुरागभक्तिजलधिञ्चोद्वेलमातन्वतः
श्रीमद्विष्णुपदस्फुरन्नखनिशानाथान्निदिध्यास्महे ॥२॥

कालाम्भोरुहचक्रवालविहरत्सौदामिनीसुन्दरं
कालिन्दीविमलोर्मिभङ्गनिपतत्सूर्यप्रभाभास्वरम् ।
माहेन्द्रोपलशैलसानुनिवसत्स्वर्णाद्रिचेतोहरं
जीयात्कृष्णकटीतटस्फुरदमूल्योदारपीताम्बरम् ॥३॥

यद् ब्रह्माण्डकटाहकोटिभिरभून्नैकांशतो निर्भरं
यद् गोपीजनदत्तगव्यकवलैराकण्ठमापूरितम् ।
यस्मादङ्कुरिते महासरसिजे जज्ञे मरालासन-
स्तत्कृष्णस्य भजामि पिप्पलदलाकारं कृशं चोदरम् ।४।

नानावर्णसुमात्मिकां व्रजवधूहस्ताङ्गुलीगुम्फितां
सच्चित्सारघनिर्भरां परिमलैर्योगीन्द्ररोमाञ्चदाम् ।
वेदान्तभ्रमरावृतां भृगुसुतादोलायितां श्रीहरे-
र्विस्तीर्णोरसि लम्बितामभिनवां वन्यस्रजं भावये ॥५॥

यन्नित्यं कलशार्णवस्य दुहितुः शय्यानिकेतायते
यच्च ब्रह्मविदो मुनेरविरतं पादाब्जपीठायते ।
यच्चाभीरवधूटिदृङ्मधुलिहामुद्यानमार्गायते
तत्प्रेम्णा मृदुलं नितान्तविपुलं वक्षो हरेरर्चये ॥६॥

आताम्रं कृतदुग्धसिन्धुमथनं गोवर्द्धनोद्धारकं
मृत्युत्रस्तधियां शिरस्सु निहितं नानापुमर्थप्रदम् ।
श्रीपाणिग्रहणोत्सुकं व्रजवधूगण्डाभिमर्शोन्मुखं
ध्यायामो नवनीतगन्धभरितं कृष्णस्य हस्ताम्बुजम् ॥७॥

कम्बुश्रीगलितं मृणालमृदुलं सर्पिःपयोलेपनै-
रत्यन्तं मधुरीकृतं मुरलिकागीतस्वरालापने ।
अन्तः कौस्तुभसौभगेन बहिरप्यारक्तमेणीदृशां
नानादोर्वनमालिकावलयितं कण्ठं हरेर्मन्महे ॥८॥

बाल्यश्रीस्फुरदिन्द्रनीलमुकुरस्वच्छं मणीकुण्डले-
नोद्दीप्तं मृदुहासदुग्धलहरीमालाभिरान्दोलितम् ।
गोपीनां परिचुम्बनैररुणितं गायन्मुखान्तर्भवै-
र्वातैः किञ्चन बृंहितं भगवतो गण्डद्वयं भावये ॥९॥

वन्देऽहं वदनाब्जकान्तिसरसस्सत्सेतुबन्धायितां
नन्दस्त्रीकरलालितां सकुतुकव्यालम्बिमुक्ताफलाम् ।
सद्यःफुल्लतिलप्रसूनरुचिराकारामुदग्रां शुभां
शब्दब्रह्मनिगूढयानसरणीभूतां हरेर्नासिकाम् ॥१०॥

दग्धानां विषपानतः स्वसुहृदां सद्यः समुज्जीवनं
लीनायाः प्रकृतेश्च सर्गसमये शीघ्रं समुद्बोधकम् ।
राधायाश्च विविक्तकुञ्जवसतेः शृङ्गारसारस्पदं
स्मेरापाङ्गविलोकनोत्सवमनुध्यायामि लक्ष्मीपतेः ॥११॥

भक्तानां शरणायिते मुरलिकागानानुपानोत्कटे
शश्वन्नव्यविलासवैभवयुते फालेन्दुवीथ्यां शनैः ।
नृत्यन्त्यौ नटराजपुण्यपदयोः शिक्षां ददत्यौ हरे-
र्भ्रूनट्यौ जगदण्डकोटिरचनाकर्त्र्यौ निदिध्यास्महे ।१२।।

ध्यायामि भ्रुकुटीविलासकरुणागङ्गोर्मिकल्लोलितं
गोपस्त्रीप्रणयावलोकमधुपश्रेणीभिरासेवितम् ।
उन्मीलत्तिलकेन्दुलेखमलकाम्भोदावलीलालितं
स्वेदाम्भःकणतारकौघखचितं कृष्णस्य फालाम्बरम् ।१३।।

वात्सल्येन यशोदया सुरभिलं व्यालिप्य तैलं शनैः
पाणिभ्यां रुचिरं प्रसाधितमलङ्कारैः शिखण्डादिभिः ।
आदीप्तं जननीगिरा स्वविहितक्षीराशनावर्द्धितं
मुक्तादामसुसंयतं स्मर हरेराकुञ्चिताग्रं कचम् ।।१४।।

यस्यां साधु तृणं चरत्युपनिषद्गोसञ्चयस्तृणया
गोपीनां शिवरात्रिमानयति या रासोत्सवोत्मीलनीम् ।
यस्यां योगसमाधिमीलितदृशः शर्वादयः शेरते
कालिन्दीतटगोचरा सुरुचिरा जेजेतु सा श्यामिका ।१५।।

भूमौ दिक्षु विदिक्षु येन दिवसाः श्यामायिताः सन्ततं
यो व्यालिम्पति लोचनेषु शिशिरस्निग्धाञ्जनं योगिनाम्
कालिन्दीमथितः प्रवाहयति यः संसारमेरौ सदा
जायादप्रतिमः स कृष्णवपुषो नीलप्रभाविभ्रमः ।।१६।।

राधासन्निधिचन्द्रिकाविकसितं चित्सौरभावासितम्
हासश्रीमकरन्दयूषभरितं वेदान्तवाणीगृहम् ।
व्यालोलैरलकालिभिः परिवृतं तापत्रयोन्मूलनं
कारुण्यामृतसंप्लुतं भगवतो वक्त्रोत्पलं भावये ।।१७।।

सम्फुल्लेन्दीवराक्षं शिशिरतरशरच्चन्द्रबिम्बाभिरामं
मन्दस्मेराधरोष्ठं मृदु मृदु विचलच्चारुचिल्लीविलासम् ।
इन्द्राश्मस्वच्छगण्डप्रतिफलितमणीकुण्डलोद्भासिकर्णं
तिर्यक्केलीकटाक्षं व्रजरमणशिशोराननं भावयेऽहम् ॥१८॥

प्रेमेन्दोर्मृदुकौमुदी किमभवाम्भोधेर्नवा किं सुधा
शम्भोः किं नु समाधिभाग्यमुत वा विश्वस्य दीपोत्सवः ।
गोपीनां श्रुतिकुण्डलं किमु रमावक्षःस्थहारो नु किं
शृङ्गारव्रततेस्सुमं किमु हरेरोष्ठे स्फुरत् किं न्विदम् ।१९।

या संजीवयते जडं जगदिदं सत्ताभिवर्षैर्निजै-
र्या सन्दीपयते विमूढहृदयं चित्कान्तिपूरैर्निजैः ।
या सम्पोषयते प्रपन्नजनतां पीयूषदानैर्निजै-
र्वन्दे कृष्णमुखाब्जताण्डवरतां तां मन्दहासश्रियम् ॥२०॥

उत्तिष्ठन्ति सुधांशुमण्डलगणाः संख्यातिगाः सर्वदा
जायन्ते सततं मनोरथदुघाः स्वर्धेनवः कोटिशः ।
क्षीराम्भोनिधयः सहस्रशतशः प्रादुर्भवन्त्यन्वहं
यस्या रश्मिकणाद्व्रजेश्वरशिशोर्हासश्रियं ताम्भजे ।२१।

दृष्ट्वा यद् विबुधः सुधामुपनिषत्पुष्पन्धयो मल्लिकां
योगी मानसराजहंसमभवाकाङ्क्षी विमुक्तिश्रियम् ।
गोपीकैरविणी सुधांशुकिरणं सम्मोहनास्त्रं स्मरः
स्तन्यं वंशशिशुश्च तर्कयति तद्ध्यायामि कृष्णस्मितम् ॥

वन्दे हासरुचिं हरेर्व्रजवधूस्नेहाशिदीपायिता-
मातास्राधरकामधेनुविगलत्स्तन्यामृतौघायिताम् ।
धर्मारामलतावितानविकसच्चारित्रपुष्पायितां
भक्त्यानन्दकलिन्दजाम्बुनिपतद्विज्ञानचन्द्रायिताम् ॥२३॥

प्रेमानन्दसुधार्णवात् समुदितां कृष्णास्यपद्मालयां
निर्वाणान्तसमस्तकामवरदामम्लानशोभायुताम् ।
ब्रह्मेशादिगवेषितां त्रिभुवनीमङ्गल्यदीपायितां
गोपस्त्रीपरदेवतां भगवतीं हासश्रियं भावये ॥२४॥

जेजीयन्तां प्रशान्ताः शिशिरसुरुचिराः प्रेमपीयूषपूर्णाः
मोहध्वान्तप्रणाशाः हृदयकुवलयोन्मीलनेऽतिप्रवीणाः ।
गोपीचक्षुश्चकोरैसुचिरममितया तृष्णया पीतशेषा
विष्णोर्वक्त्रेन्दुबिम्बात् स्वरसविगलिताहासचन्द्रातपौघाः

आरुह्य स्वयमङ्कसीमनि यशोदाया सुखं तिष्ठत-
स्तस्या सौम्यमुखे निमेषरहितं नेत्राञ्चलं बध्नतः ।
क्वापि क्वापि विरम्य पारणविधेस्सन्दर्श्य दन्ताङ्कुरान्
सानन्दं हसतः स्मरास्यघरिपोः स्तन्यामृतास्वादनम् ।२६॥

षण्मासस्य किशोरभावसरलस्याह्लादमग्नात्मनः
स्मेरास्यस्य ललाटलम्बिचिकुरस्यापाङ्गवीक्षामुचः ।
निर्यन्नूपुरकङ्कणादिनिनदस्योच्चैर्मुहुर्गर्ज्जतो
जानुभ्यां कलये हरेर्व्रजवधूगेहाङ्गणे रिङ्गणम् ॥२७॥

आकाशाद् विधुमण्डलं कथमपि व्याकृष्य माता ददौ
सस्नेहं निजहस्तयोरिति सुखस्वप्नं स्फुटं पश्यतः ।
आनन्दस्मितचन्द्रिकां विकिरतो वक्त्रेन्दुबिम्बे स्वयं
तस्या अङ्कशयस्य चिन्मयतनोर्ध्यायामि निद्रां विधोः २८

पादन्यासमहोत्सवेन धरणे रोमोत्सवोत्पादकं
हस्तस्फोटननूपुरादिनिनदैर्दिङ्मण्डलान्दोलकम् ।
भ्रश्यत्पीतपटं श्लथत्कचभरं स्विद्यन्मुखाम्बोरुहं
साकं मित्रगणैः कृतस्मरहरेर्ब्रह्मोत्तरं ताण्डवम् ॥२९॥

व्यत्यस्ताङ्घ्रिसरोरुहस्य सरसं साचीकृतास्योडुप-
स्येषद्भुग्नकटीतटस्य करुणापीयूषमज्जद्दृशः ।
चञ्चच्चिल्लियुगस्य पिप्पलतरोर्मूले त्रिभङ्ग्या स्थित-
स्याभीराधिपनन्दनस्य मुरलीगानं निदिध्यास्महे ॥३०॥

गोवत्सस्वदिताद्व्रजेश्वरशिशोः पादाब्जमूलस्थलात्
तस्यौष्ठामृतपानमत्तमुरलीनाल्या रणद्रन्ध्रतः ।
रासक्रीडनलम्पटादपि तदीयोदारपुण्याशयान्
स्यन्दन्ती त्रिविधा च रागलहरी नित्यं पुनीतां जगत् ।३१॥

वन्देऽहं पृथुकं रुचा करुणया चान्दोलिताक्षिद्वयं
वंश्या बल्लवसुन्दरीपरिषदा चापीतशोणाधरम् ।
उन्मीलद्वनमालया कमलया चालिङ्गितोरःस्थलं
मञ्जीरैर्निगमान्तवाक्यनिकरैश्चोद्घुष्टपादद्वयम् ॥३२॥

-: ० :-

राधां नमामि

कालिन्दीवारिपूर्णं कमपि लघुघटं दोर्लतावेष्ट्यमानं
वामश्रोण्यां वहन्तीं, प्रणयशिशिरिते नेत्रपद्मे समन्तात् ।
साकूतं चारयन्तीं, श्रवणपुटयुगं विष्वगेकाग्रयन्तीं
स्थित्वा स्थित्वा व्रजन्तीं वनभुवि भगवत्प्रेयसीमानमामि।।

वृन्दाकान्तिः किमु स्याद्धृतललिततनुर्वेदवाणी किमु स्या-
न्निर्वाणश्रीः किमु स्यान्नयनपथचरी प्रेमभक्तिः किमु स्यात
विद्याशक्तिः किमु स्यान्नलिनदलदृशोर्जीवनाडी किमु स्या-
दित्थं सन्देहदात्रीं जनहृदि बहुधा गोपकन्यां नमामि।२।

आघ्रातुं वनमालिकापरिमलं कञ्चित्त्वचःक्षोभकं
श्रोतुं चिन्मुरलीमनोज्ञनिनदं कञ्चिन्मनोद्रावकम् ।
द्रष्टुं कामपि नीलसुन्दररुचिं नेत्रस्य निर्वाणदां
कांक्षित्वा यमुनातटे स्थितवतीमाराधये राधिकाम् ।३।

कुन्देन्दीवरसुन्दरः किल कुतः कन्दर्पकोटिप्रभः
कुत्र स्मेरकटाक्षसारघदुघः प्रेमैकमूर्त्तिः कुतः ।
शृङ्गारार्णवचन्द्रमाः कुत इति ज्ञातुं सदा काङ्क्षिणीं
कालिन्दीतटवासिनीं सुकृतिनीं राधां नमस्येऽन्वहम् ।४।

वातापूरितरन्ध्रकीचकरवे वंशीमनोज्ञध्वनिं
खद्योते शिखिपिच्छमन्धतमसि श्यामं शरीरं हरेः ।
चित्तैकाग्रतया विशङ्क्य बहुशो व्युत्थाय हर्षाद् द्रुतं
धावन्तीं व्यथया शनैः प्रतिसमायान्तीं भजे राधिकाम् ।५।

आलोकाद्रजनीपतेर्निशमनात्पुंस्कोकिलस्य ध्वने-
रुन्मीलद्भगवत्स्मृतिं परमया तद्रागवृद्ध्या भृशम् ।
आर्द्रान्तःकरणां प्रमोदरभसेनोत्फुल्लरोमोत्सवा-
मौत्कण्ठ्येन विकीर्णनेत्रसलिलां धन्यां भजे राधिकाम् ।६।

वन्देऽहं वृषभानुजां श्रुतिशिरोमृग्यां प्रभामण्डले-
नावीतां यमुनानिकुञ्जनिलयां कृष्णैकतानाशयाम् ।
आनन्देन विलोललोचनगलद्बाष्पाकुलां, मुक्तितो
ज्यायस्या अनुरागरूपभगवद्भक्त्याः परां मातृकाम् ।७।

चन्द्रांशुस्नपिते मनोज्ञयमुनाकुञ्जे निलीय स्थितां
ध्यायन्तीं प्रियमेकतानमनसा सानन्दमेकाकिनीम् ।
कैवल्योत्तररागभक्तिलहरीपूर्णावतारायितां
वन्दे पञ्चमपूरुषार्थमधुराभिख्यां सदा राधिकाम् ।८।

मुक्तिश्रीरनुयाति यत्पदयुगच्छायां निषेवेच्छया
सस्नौ भक्तिभरेण यत्पदरजस्तीर्थे चिरायोद्धवः ।
यत्पादाब्जजिघृक्षया मधुलिहो रूपं दधौ माधव-
स्तां विश्वोत्तरवैभवां भगवतीं राधां समाराधये ।९।

मेधायां मनसीन्द्रियेषु दशसु प्राणेषु पञ्चस्वपि
प्रत्येकं सकले च रोमविवरे नाडीषु सर्वासु च ।
धातूनामपि सप्तके, निरुपमप्रेमैकमूर्त्तेस्तनौ
यस्याः क्रीडति कृष्ण एव सततं तामर्चये राधिकाम् ।१०।

इध्मं पावकपाति पावकमयं कात्स्न्र्येन सम्पद्यते
यद्वत्तद्वदनारतं भगवतो लीलारसे मज्जतः ।
यस्याः पुण्यतनुत्रयस्य बहिरप्यन्तश्च सर्वाणव-
स्सञ्जाता भगवन्मयाः प्रतिदिनं राधां समर्चामि ताम् ॥

यस्या निश्वसितादृगलत्यगणिताः स्वर्गादयो भुक्तयो
यस्या बाष्पकणात्स्रवन्ति विविधा अत्यद्भुतास्सिद्धयः ।
यस्या हासरुचेः पतन्ति चतुरस्सर्वोत्तमा मुक्तय-
स्तां वाचो मनसोऽप्यगोचरमहावीर्यां भजे राधिकाम्
॥१२॥

श्रुत्वा यच्चरितं विटोऽपि सहसा वीरव्रतो जायते
यस्या वीक्षणतो जडस्य हृदयग्रन्थिर्बलाद्भिद्यते ।
मुक्तो यत्पदपद्मपांसुषु लुठन् भक्तिं परां विन्दते
वन्दे तां जगदम्बिकां भगवतो लीलासखीं राधिकाम्
॥१३॥

यच्छ्वासः सुरभीकरोति हृदयं दुर्वासनादूषितं
यन्मूर्तिस्तनुते प्रभाविलसितामन्तर्बहिस्संसृतिम् ।
यद्गीतं परभक्तिसिन्धुलहरीमग्नं विधत्ते जग-
द्वन्दे तामवितर्क्यभूरिमहिमोल्लासावृतां राधिकाम्
॥१४॥

वन्देऽहं वृषभानुजामुपनिषद्वाक्यैरनाकर्णितां
साक्षात्कुण्डलिनीगवेषितसहस्राराम्बुजादूर्ध्वगाम् ।
कैवल्याख्यसमाधिसंज्ञितसखीयुग्मेन शुश्रूषिता-
मत्युच्चैरनुरागभक्तियमुनाकुञ्जे निलीय स्थिताम्
॥१५॥

यस्या ऊर्ध्वतरं न किञ्चिदपरं स्थानं क्वचिद्विद्यते
यस्या आर्जयितुं समानपदवीं देही न शक्तो भवेत्
यत्पार्श्वे प्रभजत्यणुत्वमपरिचिछन्नोऽपि दामोदर-
स्तां वाणीमनसोरगोचरमहोदीप्तां भजे राधिकाम् ॥१६॥

नित्यब्रह्ममहाव्रतस्य महसा विभ्राजते या भृशं
कैवल्याच्च समाधितश्च सुतरामूर्ध्वं वरीवर्त्ति या ।
यां दूरादवलोक्य मुक्तपुरुषस्सद्यः पतेद्भ्रामरा-
त्तामत्युन्नतभूमिकामविरतारूढां भजे राधिकाम् ॥१७॥

स्वर्गाद्ब्रह्मपदात्समाधिसुखतस्सायुज्यमुक्तेरपि
स्वादीयांसमवर्णनीयमतुलं गोविन्दपादास्पदम् ।
प्रेमानन्दरसं प्रभूतपुलकैरव्याहतैरश्रुभि-
र्दीर्घैर्निःश्वसितैः कथञ्चन विवृण्वानां भजे राधिकाम्
॥१८॥

—:०:—

राधावैभवम्

निर्मूलो निरुपाधिको निरुपमो निष्कैतवो निर्गुणो
निर्वाणाधिकशान्तिनिर्वृतिदुघो ब्रह्मादिभिर्मार्गितः ।
नादब्रह्मगिरामगोचरचमत्कारैस्समुन्मीलितः
कृष्णप्रेममहारसो धृततनू राधात्मना राजते ।।१।।

लोके किञ्चन विद्यते यदि भुवो वक्षःस्थलीभूषणं
कश्चिद्वृद्धिकरोऽनुरागजलधेर्यद्यस्ति चन्द्रोदयः ।
स्याच्चेत्किञ्चन वीर्यवन्मुररिपोः शीर्षज्वरस्यौषधं
राधाङ्घ्र्योस्सुषमा नखो रज इति त्रीनेव तान्विद्धि भोः

भक्तिक्षीराम्बुराशेरतिशयमथिता कीर्तनाद्यैरुपायै
रुत्पन्नं भाग्यहेतोस्त्रिभुवनविरलं निस्तुलं वस्तुयुग्मम् ।
कृष्णाख्यो मोक्षचन्द्रातपतुहिनदुघस्सच्चिदानन्दचन्द्रो
राधाख्यो ब्रह्मभूयादधिकसुमधुरः प्रेमपीयूषकुम्भः ।।३।।

कंसारेश्चुम्बनानां करकिसलययोरङ्गुलीलालनानां
पुण्यप्राणानिलानां मधुरमधुमुचां सुस्वरालापनानाम् ।
सुस्मेरालोकनानामभवसुखतिरस्कारिणां सौहृदानां
निक्षेपायात्र युग्मं विलसति भुवने वंशिका राधिका च ।।

वन्दे श्रीकृष्णमप्राकृतरुचिरघनीभूतशुद्धात्मतत्त्वं
राधां श्रीकृष्णपादाम्बुजयुगभजनानन्दपूर्णावताराम् ।
वंशीं श्रीकृष्णदिव्यप्रणयरसरहोमन्त्रदीक्षागुरुं चा-
प्येतत्प्रत्यग्रमूर्त्तित्रितयमजहरित्र्यक्षगीतानुभावम् ।।५।।

न्यासे न्यासे यदङ्घ्र्योः पथिषु नवनवं जायते तीर्थलक्षं
पाते पाते यदक्ष्णोरवतरति मुहुर्मोक्षलक्ष्मीसहस्रम् ।
श्वासे श्वासे च यस्याः प्रणयजलनिधावुद्भवत्युग्रवेला
विश्वातीतप्रभावां विधिभवविनुतां राधिकां तां नमामि
॥६॥

पद्भ्यां निर्यत्परागैर्नलिनसुरभिभिः पाविताशेषलोकां
कण्ठोद्यद्गीतरागैरमृतविजयिभिः क्षालिताकाशदेशाम् ।
विश्वातीतैर्विरागैरुपशमितनरव्रातसंसाररोगां
दिव्यैः कृष्णानुरागैर्विकसितहृदयां राधिकामर्चयामि
॥७॥

वन्दे कृष्णैकभोग्यां मृदुपवनपिकालापचन्द्रादिरूपै
रोमाञ्चास्रादिरूपैरपि विविधविभावानुभावैः प्रकाश्यम् ।
शैब्याचन्द्रादिसंज्ञैरतिसरससखीप्रायसञ्चारिभावै-
राराध्यं राधिकाख्यं निरतिशयमहाभावलक्ष्मीविलासम्
॥८॥

राधे, रागान्धचित्ते, श्रुतिनुतचरिते निर्गुणे निर्विकल्पे
कृष्णस्य प्राणभूते सततसहचरि ह्लादिनीशक्तिरूपे ।
वृन्दारण्यस्य रोमोत्सवकरि यमुनाकुञ्जवल्लीनिलीने
कान्त्या देदीप्यमाने भगवति जगतामीश्वरि त्वां नमामि
॥९॥

---: ० :---

राधिकाऽस्मान् पुनातु

गोरक्षां रासलीलां रविदुहितृतटं पुण्यवृन्दावनं च
त्यक्त्वा पत्नीसहस्रैस्सह सुखमधुना द्वारकायां वसन्तम् ।
कृष्णं स्वप्राणनाथं सकलगुणचमत्कारसंपत्समुद्रं
स्मृत्वा स्मृत्वा विविक्ते मुहुरपि रुदती राधिकाऽस्मान्
पुनातु ।।१।।

हासैर्लास्यैः कटाक्षैरवयवचलनैर्भाषणैर्भ्रूविलासै
रागालापैः प्रलापैश्शयनविरचनैर्माल्यनिर्माणयत्नैः ।
निःश्वासैरश्रुवर्षैरविरलपुलकैः स्वस्य निश्शेषकृत्यैः
श्रीकृष्णं व्यञ्जयन्ती निजहृदयगतं राधिकाऽस्मान्
पुनातु ।।२।।

चूडां शौरेः प्रणत्या नयनकमलयोरञ्जनं तस्य कान्त्या
शय्यां तद्ध्यानयोगैरतिविशदमणीकुण्डलं तच्चरित्रैः ।
पूगं तन्नामगानैरतिशयमृदुलं कञ्चुकं रोमहर्षै-
र्हारं बाष्पैः स्वभुक्त्यै रहसि विदधती राधिकाऽस्मान्
पुनातु ।।३।।

कृष्णः किं द्वारवत्यां भवति किमु ततस्सोऽद्य कुत्रापि यातः
का वा तं स्नेहपूर्वं परिचरति सदा तस्य किं क्षेममेव ।
वृन्दारण्यं कदा वा पुनरपि भगवानाव्रजेदित्यशेषान्
पृच्छन्ती मौनभङ्ग्या श्वसनविलपनैः राधिकाऽस्मान्
पुनातु ।।४।।

कुत्रेदानीमघारिर्निवसति कुशली किं यशोदाकिशोरः
प्रेम्णा शुश्रूषते का चरणसरसिजं बल्लवीवल्लभस्य ।
घोरश्शीर्षज्वरः किं प्रभवति कुहचिद्द्वारकानायकस्ये-
त्युच्चैर्जिज्ञासमाना विरहविमथिता राधिकाऽस्मान्
पुनातु ॥५॥

कुत्रास्तीन्दीवराभः क्व शिखिगलनिभः क्वेन्द्रनीलाभिरामः
कुत्र स्निग्धाम्बुदाभः क्व मकरतरुचिः कुत्र कृष्णाम्बुरस्य
कुत्र स्यादञ्जनाभः क्व मधुपसुभगः कुत्र तापिच्छवर्णः
प्रश्नानेवं मनोज्ञान् मनसि विदधती राधिकाऽस्मान्
पुनातु ॥६॥

बर्हिन् ! दृष्टं त्वया किं किमपि घननिभं बर्हचूडं स्वरूपं
घ्रातः किं भृङ्ग! कश्चित्पृथुलपुलकदो वन्यमालासुगन्धः ।
हे गोवत्साश्शृणोस्त्वं किमु किमपि दृषद्द्रावणं वेणुगीतं
पृच्छन्तीत्थं समस्तान् नयनपथगतान् राधिकाऽस्मान्
पुनातु ॥७॥

कंसारेः पादमुद्रा ध्वजयवकमलैर्लाञ्छिता क्वापि दृष्टा
विस्रस्तात्तस्यकेशात्पथि परिगलितं पिच्छमालोकितं किम्
त्रुट्यत्तन्तोः स्रजः किं च्युतमवनितले मौक्तिकं तस्य लब्धं
पृच्छन्ती सर्वदैवं सकलवनचरान् राधिकाऽस्मान्
पुनातु ॥८॥

गोष्ठं स्वाङ्गात्स्रवन्त्यां बहिरनवरतं चित्प्रभाविष्णुपद्यां
प्रेष्ठं स्वान्तर्वहन्त्यां प्रणयमयमनोवृत्तिमार्त्ताण्डपुत्र्याम् ।
गाढं निर्मज्जयन्ती पुलकरचनया सर्वतो भूषयन्ती
स्वच्छन्दं क्रीडयन्ती परमसुकृतिनी राधिकाऽस्मान्
पुनातु ॥९॥

कृष्णस्सर्वत्र जीयादपरिमितसुखं सन्ततं तस्य भूया-
न्मा भूद्दुखं कदाऽपि प्रसरतु परितः पुण्यकीर्त्तिस्तदीया
यात्राक्लेशो यदि स्यादिह कुहचन नायातु स द्वारवत्या-
मास्ता मित्यर्थयन्ती विमलविपुलधी राधिकाऽस्मान्
पुनातु ॥१०॥

श्रीराधाऽस्मान् पुनातु प्रणयरससुधापानमत्तान्तरङ्गा
निःशेषेष्वर्थकामप्रभृतिषु पुरुषार्थेषु वीताभिलाषा।
शौरेर्विश्लेषदुःखेऽप्ययभवसुखसहस्राधिकं मोदभारं
भुञ्जांना स्वार्थहीना निजरमणसुखेनैव सिद्धाखिलार्था
॥११॥

पश्यन्ती कृष्णरूपं तदमलमुरलीयानमाकर्णयन्ती
जिघ्रन्ती तस्य मालां सुमधुरमधरं तस्य कामं पिबन्ती ।
श्लिष्यन्ती तस्य गात्रं चिरतरमखिलैरिन्द्रियैः कान्तमेवं
प्राग्भोक्तुं लब्धभाग्या सुखकलितशुचा राधिकाऽस्मान्
पुनातु ॥१२॥

दावाग्निं चन्द्ररश्मिं नरकनिपतनं नाकलोकाधिरोहं
क्ष्वेलं पीयूषयूषं प्रकृतिगुणपराधीनतां ब्रह्मभूयम् ।
एकस्मिन् काल एव प्रियविरहशुचा तत्पदध्यानसौख्यात्
भुञ्जाना सर्वविस्मापनशुभचरिता राधिकाऽस्मान्
पुनातु ॥१३॥

ज्यायांसं स्वर्गमोदादधिकरुचिकरं निर्विकल्पात्समाधेः
स्वादीयांसं विमुक्तेर्निरतिशयचमत्कारमाधुर्यसान्द्रम् ।
अप्रत्यक्षेऽपि कृष्णे मनसि कृततदीयानुसन्धानयोगा-
द्भाग्येनास्वादयन्ती कमपि सुखरसं रधिकाऽस्मान्
पुनातु ॥१४॥

-:०:--

राधिका नः पुनातु

सन्तप्तस्वर्णवर्णा मुकुलितनयना म्लानसंफुल्लवक्त्रा
प्रेमाश्रुक्लिन्नगण्डा श्लथचिकुरभरा नीलनीवीं वसाना ।
दीर्घश्वासाभिभूते प्रियविरहमहादुःखदावाग्निदग्धा
तद्ध्यानाह्लादमाध्वीशिशिरितहृदया राधिका नः
पुनातु ॥१॥

किं वा वृन्दावनश्रीर्धृततनुरथवा साकृतिर्वेदवाणी
किं वा मुक्तिस्सरूपा किमु नयनपथे राजिता प्रेमभक्तिः
कंसारेर्जीवनाडी किमु रहसि लतामण्डपे साधुगुप्ते-
त्येवं सन्दिह्यमाना नरसुरमुनिभी राधिका नः
पुनातु ॥२॥

योगस्स्वर्णाद्रिशृङ्गोदितविमलसमाधीन्दुलेखाभिरामा
ज्ञानक्षीराब्धिनृत्यत्प्रणयरससुधा माधुरीलोभनीया ।
कृष्णाङ्गाम्भोदपाली सततरलचिच्छक्तिविद्युल्लताभा
कैवल्यारामलक्ष्मीः सुरभिलरुचिरा राधिका नः
पुनातु ॥३॥

श्वासानां पुण्यगन्धैस्सकलजनमहापापमुद्वासयन्ती
सर्वाङ्गेभ्यः स्रवद्भिस्सुरुचिरकिरणैरागमान् भासयन्ती
बाष्पैर्दृग्भ्यां गलद्भिः प्रणयरससुधासिन्धुमुद्वेलयन्ती
कृष्णाकुञ्जे वसन्ती मधुमथनसखी राधिका नः
पुनातु ॥४॥

यस्याः प्रेमाश्रुधाराः पृथुपुलकचया दीर्घनिःश्वासवाताः
नेत्राद्गात्रादुरस्तः स्वरसत उदिताः केशवध्यानजाताः ।
क्रेतुंशक्या यदि स्युः स्सनकशुकमुखा योगिनः स्वं समाधि
विक्रेतुं कामयन्ते तृणकणमिव सा राधिका नः पुनातु ॥

कान्तस्य ध्यानयोगावनदरतताकृत्तेन सारूप्यमाप्तां
यां दूराद्वीस्य सख्यः प्रणयपरवशास्संभ्रमाच्च भ्रमाच्च ।
'आयातः कंसहन्ते' त्यहमहमिकयाऽभीक्ष्णशोऽभिद्रवन्त्यः
क्षोभं भूरि प्रयच्छन्त्यखिलमनसि, सा राधिका नः
पुनातु ॥६॥

प्रागेवान्मन्यसाधारण विमलमणीदर्पणाभे प्रविष्टं
कृष्णं देशान्तरेऽद्य स्थितमपि निकटे प्रस्फुटं दर्शयित्वा ।
अन्यासां गोपिकानां प्रियविरहशुचं मार्ष्टि या क्वापि
किञ्चित्
सा कृष्णस्यैव मूर्त्तिस्सतविलसिता राधिका नः
पुनातु ॥७॥

या जज्ञे मीलिताक्षी भगवदितरवस्त्वीक्षणाद्भीतिहेतो
स्पृष्टा कृष्णेन पक्ष्मस्वमितरसयुता या क्षणादुन्मिमेष :
दिव्यप्रेम्णो महिम्ना किसलयमृदुलीभूतमूर्न्याश्च यस्या
नाङ्घ्रिस्पर्शं तृणानामसहत पथि सा राधिका नः
पुनातु ॥८॥

यद्गीतां भृङ्गगाथामनिपटुधिषणो नोद्धवो बोद्धुमीष्टे
यस्या नामाऽपि वक्तुं निजसुखरसिकश्शङ्कते व्याससुनुः
यस्या लाभाय भूयोऽप्यतिकठिनतपस्तप्तुमिच्छन्निवागाद्
गोविन्दो द्वारकां, सा निरुपममहिमा राधिका नः
पुनातु ॥९॥

यस्यां लिल्ये स्वमूर्त्तेराधिकमपि महो यत्समीपस्थिताया
निःशेषं लेष्यते तत्पुनरपि यदि सा संवसेदत्र यस्याम् ।
तत्त्राणायेव यस्या परिसरमजहात्स्वस्य कृत्यान्तराणां
सन्वाद्दामोदरस्सा प्रियहृदयहरा राधिका नः पुनातु ॥

वृन्दारण्यप्रविष्टानखिलतनुभृतो या तनोत्यात्मतुल्यान्
यस्माद्धेतोरिदानोमपि सकलजनाः पूरुषाश्चाङ्गनाश्च ।
अन्योन्यं क्षेमवार्त्तां पथिपथिमिलिता यत्र पृच्छन्ति यस्या
नाम्ना संबोधयन्तः, परमसुकृतिनी राधिका नः
पुनातु ॥११॥

मानन्दं यदीयं स्वयमनुभवितुं बद्धतृष्णो मुकुन्दो
जज्ञे गौराङ्गमूर्त्त्या पुनरपि भुवने रामकृष्णस्तु पश्चात् ।
आराध्याङ्घ्री यदीयौ विधिवदथ यया तन्मयीभूय चान्ते
विन्दन् कृष्णोपलम्भं चिरमरमत, सा राधिका नः
पुनातु ॥१२॥

-: ० :-

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठे	श्लोके	पङ्क्त्याम्
वर्वंति	वर्वर्ति	२	७	४
मञ्जीरैमणि०	मञ्जीरैर्मणि०	६	२	२
पिञ्छो०	पिच्छो०	७	८	१
रसानम्	रसायनम्	८	सर्वोच्चपङ्क्त्याम्	
पिञ्छिका	पिच्छिका	८	१०	४
प्रस्फुद्०	प्रस्फुरद्०	८	११	३
हर्षमङ्घ्रयो०	हर्षमङ्घ्र्यो०	१३	४	३
कालयत्रे	कालत्रये	१६	१६	१
फणाछत्रा०	फणाच्छत्रा०	१७	२	१
चिन्तमग्कां	चिन्तामग्नां	३२	८	२
०मोहान्धकारो	०मोहान्धकारे	३३	१०	१
रमयम्	रमयन्	३५	१	१
त्रासस्म्भ्रान्त०	त्राससम्भ्रान्त०	४१	१	१
सदानन्द०	स्सदानन्द०	४१	२	४
महागोग०	महायोग०	४१	३	१
एकाकिना	एकाकिनी	४९	१	१
विदेद	विवेद	५०	१०	२
प्रबुद्द्य	प्रबुद्ध्य	५०	११	१
०धर्मविन्दून्	घर्मविन्दून्	५३	२६	३
शदागमः	शरदागमः	५३	२८	२
कदां	कदा	६०	६५	४
०शाशङ्कातप	शशाङ्कातप०	६२	७६	१
क्वः	क्व	६७	१०८	४
भयान्मे	भायान्मे	८८	४	१
ह्राद	हृदि	८८	४	१
०मूत्ति	मूर्त्ति	८८	५	१
०फुल्लारना०	०फुल्लानना०	८८	५	१
०राधिना०	०रातिना०	८९	७	३
०सरञ्जिता०	०संरञ्जिता०	८९	८	१
निस्पृहाः	निस्पृहाः	८९	९	२
सन्मातुं	सन्त्रातुं	९६	२७	३
०त्मीलनीम्	०न्मीलनीम्	१००	१५	२
जाया०	जीया०	१००	१६	४
०ह्रींसश्रियं	ह्रींसश्रियं	१०१	२१	४
०श्चकोरैसुचिर०	०श्चकोरैस्सुचिर	१०२	२५	३
०मज्जदृशः	०मज्जद्दृशः	१०३	३०	२
स्यन्दन्ती	वर्षन्ती	१०३	३१	४
०मुरलीयान०	०मुरलीगान०	११२	१२	१

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) रु० १५.००
(सं० : डा० रमाकान्तशुक्लः)
२. ,, ,, ,, (द्वितीयखण्डः) रु० ३०.००
३. ,, ,, ,, (तृतीयखण्डः) रु० ३०.००
४. कर्णभूषणम् (डा० सी०आर० स्वामिनाथन्) रु० ५.००
५. भाति मे भारतम् (डा०रमाकान्तशुक्लः) रु० ४०.००
६. श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः) रु० ३०.००
७. सुगमरामायणम् ,, ,, रु० ३५.००
८. हरविजयस्य साहित्यिकमध्ययनम् रु० ६०.००
(डा० कृष्णकान्तशुक्लः)
९. श्रीमदप्पयदीक्षितचरितम् रु० २०.००
(डा०हरिनारायणदीक्षितः)
१०. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा०र०च०शु०) रु० ३५.००
११. सदाशिवसमुच्चयः (टी०वी०परमेश्वरअय्यरः) रु० १५.००
१२. आभाणकमञ्जरी (,, ,,) रु० १५.००
१३. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
१४. रघुवंश : एक विश्लेषण (,, ,,) रु० २०.००
१५. अभिज्ञानशाकुन्तल : एक विश्लेषण (,,) रु० २०.००
१६. कालिदास की कला और संस्कृति (भाग २) रु० ६०.००
(लेखक: डा० देवीदत्त शर्मा)
१७. जय भारतभूमे ! (डा० रमाकान्तशुक्लः) रु०. ३०.००
१८. राधाकृष्णरसायनम् रु० ४०.००
(श्री ओट्टूर उण्णि नम्बूदिरीपादः)
१९. अर्वाचीनसंस्कृतसाहित्यपरिचयः
(सं० डा० रमाकान्तशुक्लः)
२०. साधारणीकरण और समानान्तर चिन्तन
की पूर्वपीठिका (डा० सुलेखचन्द्रशर्मा) रु० ५०.००
२१. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्रशुक्लः) रु० २०.००

प्राप्तिस्थानम्

'देववाणी-परिषद् दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-५९